तः निंदादीनामसूयांतानांसमाहारद्वंद्वेसौत्रंपुंस्त्वंस्यादेतत् असूयतेरेवबुञ्विधेयोनेतरेभ्यः निं
दादीनांएवुलेवसिद्धेः निहिलित्स्वरनित्स्वरयोर्विशेषोस्तिउभयथाप्याद्युदात्तत्वात् असूयतेयोनेत ३५

रेभ्यः मिदादीनांएवुलेवसिद्धेः निहिलित्स्वरनित्स्वरयोर्विशेषोस्ति उभयथाप्याद्युदात्तत्वात् अस्तयतेस्तु
एवुलिलिभीतिप्रत्ययात्पूर्वमुदात्तः उञ्छितुञ्जिनित्यादिरुदात्तइतिविशेषस्तत्राह एवुलितिन्ञादयोनेने
दंएवुलविषयकमेवज्ञापकंकिंतुसामान्यतः प्रत्ययमात्रविषयकमित्यर्थः देविक्रुशोः दीव्यतेर्हेतुमण्णि
तस्यदिवुकूजनेइतिचुरादिण्यंतस्यचग्रहणं चलनशब्दार्थात्तेतश्चहलादेः ननुसेवाप्यनुदात्तेत्त्वहलंत
एवतदिंतविधिंबाधित्वासामर्थ्याद्धलादिरेवग्रहीष्यतेतत्किंमादिग्रहणेनेतिचेत् अत्राहुः आदिग्रहणाभा
वेहलंतादित्यर्थः स्यात्तथाहिसत्येथत्वेसादावतिप्रसंगः स्यात् जुगुप्सतेइत्यादिमनसिद्धेत् अस्तिचेहानु
दात्तत्वंगुपादिष्ववयवेषुचरितार्थस्यानुबंधस्यसमुदायविशेषत्वादितिदिक् जुचंक्रम्यक्रमिद्रमीयङ्
तौक्रमणपादविक्षेपेद्रमहम्ममीमगतौ एर्वैणेति अनुदात्तेतश्चेत्यनेनइहपदिग्रहणंसकर्मकार्थमिति
कृतोक्तंभाष्येतन्नअनभिधानादेवसकर्मकान्नभविष्यतीत्युक्तत्वात् ज्ञापनार्थमेवतद्धिमाधवेनाह वाधमा
भूद्दिमादिपरस्परमितिनिंदादिसूत्रेहितच्छीलादिषुवासरूपविधिनात्तजायेनेतिज्ञापितगिइत्वताच्छी^
लिकेषुपरस्परंनेति ज्ञापितमितिविवेकइतिभावः क्रुधक्रोधेरुषरोषेमडीभूषायामअलंकारनद्यः अ
यययनगतावितिपठितस्यनयतेनायंनिर्देशः अनुदात्तेत्त्वादेवयुचःसिद्धत्वात्किंतुनेतिएयकादमिति

त॰बो॰
नी॰
३६

मनाद्द्यकारांतादितिङ्खीयिताद्दीयितेतिक्रयीशाह्वेंउदेचत्स्मांयीविषःतने स्ददीपस्ट्दत्तरणेदीपी
दीमादीत्वमोइस्रेजादौताच्छीलिकेष्विति परस्परमितिशेषः प्रायिकमितिनकेवलंयथाश्रुतभाष्य
मवलंब्यपुत्रयेरेवसमावेशइतिमंतव्यः किंतुप्रायिकत्वएवभाष्यतात्पर्यंतेनगमेर्लषत्तपदेसुक
ञ्विषयेत्त्रपिगंभागागामुकः तथावोकषलसेतिपिनुराविषयेपुज्जपिविकल्पीविकत्वनइसादि
सिध्यतीतिभावः जल्पजपजल्पमकायांभित्तानिहायांलाभेऽप्रलाभेचकुरच्छेदनेलुंस्तेपेचोरा^
दिकाविसा ऽत्रत्वाचादेः जल्पेचलनशाद्रष्पीदितिमितेरनुदात्तेत्त्वातियुचिप्रामेकुरलुंटयोर्न^
स्कुंरसीतिरस्तचिप्रामेवृदुस्वादगमजनेतिकिकिनोः प्रामयोरयंविधिरितिबोडोषधर्धइसादह वरा
कोति प्रजोत्त्वइतिसोत्रोगनद्वसर्थः जिरहि ः जिनयेजि अभिभवेरङु आदरेहित्तयेहितिनिवासगमोः
श्रिजेसेवायांविश्वः स्वपभयसंचलनयोर्नञ्पूर्वः निपातनान्नञाधात्तेनसमासेनलोपेततः प्रसयः अ
मगास्मादिषुनिश्वः प्रसवतिषप्रेरणे अस्मादिभिः षूङ् प्राणिगर्भविमोचने षूङ् प्राणिप्रसवेइमोन
यस्येनेसानुबंधत्वात् जिरहीत्सत्रैवप्रयुंपठित्वाश्वसत्रंमकगुचितंएवंहिएथग्विभक्तिस्त्वकारा
श्रमात्मिति स्वचंस्पद्दिस्टहईप्सायांग्रहग्रहणेपतगतो त्रयस्त्रुवादाविति नेनणेरयाहेशेन ३६

रूपसिद्धिरितिभावः यद्येवंणिचि उपधागुणवृद्धी स्यातामत आह अदंता इति तत अल्लोपस्य स्थानि
वत्वेन तदभाव इति भावः तत्सर्वं इति तच्च ह्रस्वसमासेपि निपातनादिति बोध्यं डुधाञ् अत्सर्वः श्रद्धलुः
धेटस्त्वनेनेदंरूपं अत्सर्वस्य तस्य प्रयोगाभावादिति व्याचख्युः कथं कृपालुः श्रद्धालुरिति कृपांसहा।
चलातीति विग्रहे मृगय्वादित्वात् कुः दाधेट् च डुदाञ् देङ् दोङ् त्रयाणामेव ग्रहणं न तु दाण् दीयोरित्याह ।
भंगुर इति च ग्रोरिति कृते अभिधानस्वभावाद् क्रुञेः कर्मकर्त्तर्येवेत्याह विदिभिदिछिदेः ज्ञानार्थस्यैव ग्र
हणं न तु लाभार्थस्य व्याख्यानात् छिदुरमिति कर्मकर्त्तरि प्रत्यय इति वृत्तिः नैतद्भाष्ये दृष्टं तथा च माघः
मृत्येकर्त्तरिप्रयुक्तः प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयाचितमंगना इति इद्द ग्यडुरिति छेदः इत्वरः
इत्वरी इति इण् गतौ ह्रस्वस्य पिति तित्नुक् कित्वाद्गुणाभावः टिड्ढेत्यादिना स्त्रियां ङीप् यातुक्कः यायुरि
तिपंचमं ततश्चावश्येज्ञा मन्त्रेविति जागमहक इति सिद्धं रूपमेव तु न निपातितं उन्नरस्य चेऽकस्यानुष्ठ
निप्रसंगात् यजपाजन्नूक इति यजेर्यङि द्वित्वादि दीर्घो कितेऽभ्यासदीर्घः अतोलोपो यस्य हलइ
ति यलोपः जंजपूकः इत्यादि जभरदंदशोत्यादिना नुक् वावदूकः प्राकृत्स्नः उलूकादयश्च मत्रवसते
माधवस्त्वाह कुर्वारगणे वावदूक इति पाठादेव यङ्न्तादेरूपं प्रत्यय इह स नासंसाक्षनिति प्रस

३० यग्रहणमन्तरेणतग्रहणंघञादानेषणसंभक्तौविभिधातोस्लनेरहग्रहणंगार्ग्यादिषुविजिगीषुशब्दस्य
पाठात् अषांसेत्माद् ।।शंसहछायामिमयंगस्यतेननत्वंशंसम्लताविति आद्ऽसहनिर्देशात् विंदु
रिच्छुः विदज्ञानेइत्यस्यैवग्रहणंनेतरेषांएवमिषेरपिइच्छार्थस्यैवग्रहणंनत्विषगतौइषुआभीक्ष्ण्येपर
स्मनेयोः अनभिधानान्निपातनाद्वेतिभावः विंदुशब्दस्यपक्षीयादिः विदिअवयवे असात् रात्या
दित्वात् प्रययोवोधः कन्छंदसिकाइतिकाचकाघकाउं सामास्यग्रहणंकान्तधातोश्छंदसिविषये
नत्वोलादिषुउप्रत्ययोभवतीतिकाशिकाकिरः काइतिव्याख्यानात्कंडूादिपाठगपिठस्यतेतेनउरणयवा
गितिसोनत्वनसस्पर्पेमरपर्यवः पमस्पयोनोशाक्रुनेत्वरणधुमित्यादिसिद्धंनुरणत्वरायांसपरंशरजा^
धीन्मुरणथारणयोषणयोरिमेनेकंडूादिषुपविताः अथकथंसंतः प्रणयिवाक्यानिगढंतिघनस्य
वइति भट्टपादाः मृगयादिषुअस्यपशब्दोइश्वाइतिदरदन्तः सूमेधुरितिसमशब्दात्म्यचितदनाद्भुः न
च्छंदस्यपुत्रस्येतिनिषेधात्क्यचिचेतिईत्वमहू ल्सार्वेतिदीर्घश्चनभवति आटञ्जदोरवितिवदादितिदका
रोम्नुत्वस्यघार्थोमतवयंनकारस्तेननतामरत्वाभाहूइसनेनदीर्घोपिस्यतेननविजेगुरिः इमवणनरयो
रित्यस्यगनिगरणेइत्यस्यचवहुलंछंदसीतिरूपिमितिमांचः वस्लनस्ल आदिमादिप्रकृतिविशेषण ३०

मुदाहरणप्रपंचमात्रं किं किनौलिङ्गेमेभावन्मात्रमेवृद्धितंतत्पाचवार्त्तिकंकिनाकुत्सगेप्सङंदसिसदादि
भ्योदर्शनादिति उदाहृतंचभाष्येसेदिर्नेमितित्यादिएवं स्थितेऽग्रादिति नपरकरणेऽपिनहतिरिति ध्वनयन्नाह
स्रांदनारंदनादिनिमिर्थज्ञमितिनलोकेतिषष्ठीतिषधार्हेतीयाकिकिमोःस्थानेतिवादयोनलिङ्गादित्व
तिदेशनस्वरूपावधेनैवकार्यातिदेशात् छंदसस्त्रहयोपन्नाकुचिदृन्निपुसकेचदर्शनानुपन्नस्तः ज
ग्मुरिति गमहनजनेत्युपधालोपः जघ्निवित्ति अभ्यासाच्चेतिकुत्वंदधिवितिअनोलोपः नेमिरितिएत्वाभ्य
लोपौसासहीमादि यङोतोलोपयलोपः अभ्यासदीर्घः नीगभावश्चेतिनीगवंचीसादिनाप्राप्तमस्यनीगाग
मस्याभवइत्यर्थः तत्सनितितिडितान्नगुणः नजिरुः इकारउच्चारणार्थः क्रुवत्रयीति अतएवभीरुतीलुक
भीरुकाइत्यमरः ईश्वरइतिनेट्वग्राइभावः पश्वरइति पिसगतौभाजभ्राक्केरित्युक्तत्वान्नछीलादिषु पुं
स्त्विएभ्राजदीप्तौधुवाहिंसायांयायुतदीप्तौउर्जवलप्राणयोः ऊपालनपूरणयोः जगतौसोत्रःग्राठरुर्वः ध्रु
न स्त्रुतौविभ्राति वश्चेतिषत्वंजश्वचर्त्वं पूर्वितिराञ्चोपइतिचलोपः वोरुपधायाइतिदीर्घः कुर्गिति चोः कुः
रान्नस्येतिनियमान्नसंयोगान्तलोपः पूरितिउदोष्ठ्यपूर्वस्येत्युत्वंर्वोरितिदीर्घः वाहूझाठिति इहदीर्घः संप्रसा
रणमाभिन्नत्वचिन्माशायेस्वास्वापिग्रहिज्यावर्धासादिनाऽयनिहरिश्रीरितिप्राचात्तअयंमेतामितिक

न॰ त्रो॰
नी॰
३८

मेणपाङ्गुणित्विकुदाहृतस्तत्रकर्त्तेक्तदितिसूत्रविरोधः सम्बुएवंबाहुलकं त्वग्रगतिकगतिः ह्वे चेतिकृतेपि
द्वित्वेऽभ्यासस्संज्ञेहृ दुर्लभाभ्यासस्याषाष्ठद्वित्वएवप्रवृत्तेरतएवश्राष्टमिकेसनेत्याष्टकायामाह हृदशि
ग्रहणादिति दिद्युदितिद्युतिदिति स्वाप्योरित्यस्याधास्सप्रसारणं जगदिति गमःक्वौविति मलोपत्तुक्
अत्रद्वेचेतिचकेणदीर्घः समुद्धीयमानोद्युतिगम्यातभवतिदीर्घश्च त्यागश्चरश्चेतिपरिभाषोपस्थानादद
जंतस्यजुहोतेरेवसंभवतीत्याशयेनाह जुहोतेर्दधिश्रीतीजुहोतीति जुहुः क्रूसश्चेतिचकारेणद्वित्वं
समुच्चीयतेधीरिति ध्यायतीतिधीः हलइतिदीर्घः ननुध्यायतिपुरुषानन्नुधीः एवंजुहोत्यनया
पुरुषइतिसर्वसमतत्वात्कथंहिभवडुक्ताप्यः संगच्छतइतिचेत्र अत्राहहरदत्तः करणस्यकर्त्तृत्वविव
वक्षायांक्विपिति भुवः संज्ञान्धनिकेत्यादिनेनग्रामयोरन्तरेयत्क्षिप्तितत्रवेनेतिभावः एतच्चहरिणाग्र
हणान्नुच्यत्यालभ्यतेननैवंप्रतिभूःप्राहू संज्ञेसत्त्वेनेतिभावः एतच्चहरिणाग्रहणान्नुष्वत्यालभ्यतेनवे
वंप्रतिप्रतिभूःप्राहूः संज्ञेतिफलितेतत्रसंज्ञायामित्येवसिद्धेकिंमन्तरग्रहणेन अत्राहुःयावद्रव्यभा
विन्यः संज्ञाः प्रातिभूःप्राहूलक्षसमेवतस्मिन्नन्तरग्रहणेननिवर्त्ततइत्युभयोर्भेदइतिशंसत्त्वभाव
यतीतिशंभुः वित्यपोभ्युपगमेनाह अंतर्भावितेति शंभवतिमनुष्वितत्वत्यंभवतीतिशंभुरित्यन्ये ३८

संभवत्तस्मादितिवृत्तिकृतः अपादाने तुमुन्स्याभावाच्चिंत्यमेतदिति माधवः धः कर्मणि कर्मणीति नोपप
दंष्ट्रावामश्रमनंतरमेव धः ष्ट्रनिति वक्तव्ये ४०३ यत्कर्मग्रहणात् व्याख्यानाद्धेमाश्रयेणाह कर्मणि धेट इ
ति अत एव धीयते इति धात्री स्तनदायिनीत्यादि व्याचक्षते दाम्नीमिदमिति दोहः धत्वष्टुत्वढलोपाः
दंष्ट्रेति षित्वेपि ङीषिह न भवति अनित्यः पित्तां ङीषित्युक्तत्वात् अन्ये त्वजादिपाठाट्टापमाहुः नद्धीइति
नह्यथ इति धत्वं कषस्य पोयेधिः शात्संस्त्रे देशेति क्कोपिनो निर्देशो ज्ञापकः क्वचिदकित्यपि दंशेर्नलो
पो भवतीति तेन दंशने इस्मात् ष्टुरिपादशनादंता इति सिद्धं न च सन्निधानात् ष्ट्रने च लोपः स्यादि
ति वाच्यं अनोदंतंदंष्ट्रेति निर्देशात् तत्रैव तत्करणमित्यादि एतेन हलसूकरयोरभिधेयत्वमुपपदत्वं च
निरस्तम् एवमिमर्थ इति तत्रैव वृत्तिरिति भावः अर्त्तिलूधूसू इति धुविधूनने इति कुटादिरेव गरत्वेनानिर
नुबंधकत्वात् एत एव ङूङ् कूङ् शब्दे इति ङित्वाद्गुणनिषेधश्च वदुः तदाह धवित्रमिति पुवः ए ३ ए ओहम
योर्ग्रहणमविशेषात् करणे इमन्त्रष्ट्रनिराह जनार्ममिति कर्त्तरि चर्षिदेवतयोः स्यादिति करणे कर्त्तरि च यथास
ख्यः काशिकानुसारेण यथासंख्यमाचष्टे ऋषौ करणे इति कर्त्तरिक्षदिति सूत्रस्य भाष्ये केयटया
स्तु यथासंख्येनेति गम्यत इति प्राहुः केचित्तु भेदस्थिते अचोणादयः कृत्वापाठकम् करणे वा गति

ते·वो·
नी·
३९

गंधनयोः पायाने पारत्वणेजिघ्रअभिभवेडुमिञ्प्रक्षेपणे स्वदआस्वादने साधुसंसिद्धौ अअउ आप्नोवि
ष्वकर्मणि नाकारुस्त्रि पुकारकशिल्पिनोरिति मेदिनीकेशः कारुशिल्पिनिकारके इति धरणिकोश
स्तदेतदभिप्रेत्याह काहरित्यादि आद्येयोगरूढिः द्वितीयेतुयोगमात्रमिति विवेकः अतएव द्वितीयेह्रों
तुर्यप्रतिकारकान्वयोभवत्येव तथाच भट्टिः राज्ञवसतथाकार्यंकारुर्वानरपुंगवः सर्ववानरसेना
नास्वगमनमादिशदिति पविस्मनेन तैलादिकमितियायुर्गदस्यानं गुदत्वपानं पायुर्मेत्यमरः पातीर
क्षतीति विग्रहे रत्नकोपि च तथा मंत्रः भुवस्तस्य स्वतवाः पायुरग्ने इति स्वतवामायरविति नस्पृहत्वेअग
द्वेजायुरित्यपीत्यमरः पुल्लिंगसाहचर्यान्मायुः पुंसि मायुः पित्तं कफः श्लेष्मेत्यमरः गोरुर्वागांवा चंवि
वदितं मिनोतीति त्रिदिवपतीति गोमायुः सृगालः इत्युज्ज्वलदत्तः वस्कतस्कमायुः शार्ङ्गः पतत्पुर्मायुमङ्क
ताः गोमायुरेकः इत्यादौ वेदभाष्यकारादिभिस्तथैव व्याख्यातत्वात् स्वदते रोचते इति स्वादुः विशेष्यनिघ्रा
यं एवं साधुरपि आः हेशीघ्रमिति विलंवाभावमात्रे क्लीवं तद्विशिष्टद्रव्यपरत्वे तु लिंगत्रयं यशीघ्रं त्वरि
तमित्युपक्रम्य क्लीवे शीघ्रादयस्त्वेस्यात्रिषु तद्वदभेद्यगामि यदित्यमरः व्रीहौ पुंस्येव उउणादयो वहुलमि
ति वहुलवचनादन्यस्मादपि एभवति रहत्यागे गृहीतावच त्रंहति मज्जतीति राहुः वसुनिदानेवसत्य ३९

स्मिन्सर्वमितिसर्वत्रासौवसतीतिवावासुः वासुश्चासौदेवश्चवासुदेवः वसुदेवस्यापत्यमित्यस्मिन्नर्थेऽऋ
ष्यंधकवृष्णिकुरुभ्यश्चेत्यणिकृतेवासुदेवइति उत्तमत्रांतरमितिदिक् छंदसीणः तुणनुववन्नेएतिगच्छती
त्यादिमंत्रेषुभेदभाष्येतथैवव्याख्यातं अर्वाचीनास्तु छंदसीयुःमानश्चायावितिआयुशब्दमन्नपर्यायेषु
निर्घंटौपठितः अतएवत्वामग्नेप्रथममायुमायुंवेपमानस्तोकेननयेमानश्चायाविमाणइतिसूत्रवद्बहुल
वचनाद्भाषायामपिप्रवर्तनइतिसीरिरूम आयुर्जीवितकालोनाइत्यमरग्रंथेआयुशब्दमकारांतमाचख्युः
ननुएतेर्णिच्चेत्युसप्रत्ययेसकारांतोवक्तुमाणश्चायुःशब्दः लोकवेदयोर्निर्विवादएवजाद्ध्रुआयुरस्येतिवि
ग्रहेसंप्रसृतात्जरायुषमितिरामायणप्रयोगोयदित्रिश्लोकीगणनापरास्यान्तस्यासमाप्तिर्यदिनायुषःस्यादि
ति श्रीहर्षप्रयोगश्चसंगच्छतेतथाचायुर्जीवितकालोनेत्यत्रायुःशब्दःसकारांतइत्येवव्याख्यायताकिंमु
कारांतताभ्युपगमेनेतिचेतिदग्राहुःसकारांतःआयुशब्दोनपुंसकइतिनस्वपुल्लिंगतानेत्याशयेननतथोक्तमिति
अमेतच्छंदसीणइतिसूत्रस्यभाषायामप्रवृत्तभावेमावधीरुजरायुमामिति भट्टिप्रयोगः तटीविंध्यस्यानेस्भ
जंतजरायोरप्रथमजइतिविंध्यवर्णने अभिनंदोक्तप्रयोगश्चनगच्छतेसाहुः वस्तुतस्तुजरांप्राप्तिप्राप्नोती
तीतिजरायुःमृगय्वादित्वात्कुः आयमायुःएवंचजरायुषाजरायुंजविद्यादायुंतथायुषेति द्विरूपको

न॰ बो॰
नी॰
४॰

शः वायुनाजगदायुनाइतिवर्णविवेकश्च स्त्रसाधइतिदिकस्थानिरविदारणेघ्रणदार्णेजगननेचरग
तौ चटभेदनेदार्वितिकाष्ठंदार्विधनंतेधइत्यमरः चाद्विति चटुचाटुप्रियवाक्यमितिहेमचन्द्रः चाटुनर
मियोक्तिः स्यादितिरत्नमालीकेशः नरिपुंसिचक्रवचचाटुत्रमोहयोद्दिषदस्येतिमाचेःमाध्येत्रनपुंस्त्व
क्रमपिदर्शितंचाटुचाक्रुतनकंसभ्रममासामितिकंजरपरेः श्रृहिंसायांइणगतौ आभ्यांत्रुणस्मात्वस
स्यातिकिंसाहर्नास्मस्मश्रूकेविशिखेकपत्त्रिणीतिमेदिनीकोशः त्रोरश्वलः त्रुप्लवनतरणयोःत्रः रश्चेति
छेदः केचित्त्रन्नइतिमश्लिष्यद्वयोरपिसवर्णदीर्घेत्रातयोस्त्वयोरित्रन्काऽन्नगतावित्रस्मादपिगुणरस्य
लइतिव्याख्यायइयर्त्तिऽर्थयतेवाऽऽलुःशाकविशेषोघटीचस्यादुःकर्कर्यालुर्गलंतिकाभस्त्रशीभत्न
भरणेभस्त्रडुभ्राणणागेशीडुस्वमेत्रस्त्रवनतरणयोः चरगतौऽयंभक्षणेपित्रहव्यमगतौतत्रविस्तारे
धनधान्येडुमित्रमक्षेपणेडुमस्जोप्नेहोभरुः स्वरोहवेमेदिनीकोशः तरुभर्त्ताकनकयोरितिहेमचन्द्रः
शायुरपि अजगरेशायुर्वाहसः इत्युभाविस्मरः तरुरितितरंतिनरकमनेननरोपकाः चरुरिति अतव
त्त्राविततांतरूष्मपक्वओदनइतियाज्ञिकाः नरु च्चवधिकरणेप्येवमत्रकेत्रुगवादिभ्यायदिति स्तेचैकेयदस्त्रा
हस्यालीवाचीचरुशब्दस्यास्यादोदनेभाजनइतितनुःकोपेत्वचिहस्तीस्यात्रिषिल्याविरलेकेशाइतिमेदिनी ४॰

धनुःपुमान्प्रियालद्रौराशिभेदेशरासनेइतिनांतेमेदिनीविश्वप्रकाशमप्युदाहृतमितिधनुषाचेमादिधनुषा
शार्ङ्गधन्वंविदुरितिसर्पः स्यात्तनुःतनुषाशार्ङ्गमिमतःशार्ङ्गमितित्वनुषज्यतेपूर्ववंशनानितोपिगुणस्य
स्यानतामनुभवन्नपिशङ्कः छिन्नरेभमनुमाप्सुतपत्त्रसायकमितिश्रीहर्षः श्लोकशेषः धनुर्वंशविशु
द्धोपिनिर्गुणः किंकरिष्यतीतिधन्वंतरिः इहसर्वत्रचधनुरितिउकारांतःसकारांतंतन्नुनेहवाकुलकात्समु
त्कंरंगवदनोमरुडोपिमयूरिष्यतेइतिविश्वःमज्ञातितानीयइतिमउः श्रणश्रश्रणाहेश्रस्माडुःप्रसयःस्या
त्चादिविकटेवृषादौवटवेष्टनेकूटतिरसनामितिकउःकटुःस्त्रीकटुरोहिण्यांलताराजिकयोरपिनपुंस
कमकार्येस्यात्तुल्लिंगोरसमात्र चेत्रिषुतद्वत्सुगंध्योत्रमत्सरेपिरवेरेपिचेतिमेदिनी वचतीतिवटुर्द्विज
सुतःस्मृतइतिसंसारावर्तैः नटवटुरितिरूपचारःवृत्रअभिप्रेतिपचापिफलपादीतिसूत्रेपाचदनुवर्तेत
इतिन्यासग्रंथेनमर्यादाक्रमेत्रापिप्रतीयतेतेनपाप्यभिव्याप्यसेवाचित्वेसोम्यमध्वित्पादोमधुपास्याप्युदात्त
त्वेनादर्शनात्वोतोगुणवचनादितिसूत्रेहरदत्तेनाप्यभिव्याप्येतिस्पष्टमभिधानाच्चेतिभावःशरत्स्त्रि
हि प्रहिंसायांस्पशहौयापतापतापयोःस्निहउपतीयेत्रपषूलज्जायांश्रसूत्रेयपणेवसनिवासेहनहिंसाग
त्योः क्विपूश्चार्द्रभावेवंधवंधनेमनज्ञानेम्रह्महरितिशाहःकोपेसवेत्रेइतिहेमचन्द्रःस्वहवज्रमितिशात

ना॰ को॰ टी॰ ८१

कोटिः स्वरूपं वद्रत्यमरः त्रपुसीत्यमितितत्त्वं अग्निं दृष्ट्वा त्रपते लज्जते इति वा त्रपु चारंगं सीसकयोस्त्रपु इति मे-
दिनी अस्यंतिर्त्त्विपतिपारीरमिमस्य वः प्राणाः हनुरितिहनुः पुमान् परोगंगडादिति वररुचिकोशः स्त्रीलिं-
गोप्ययं हनुहट्टविलासिन्यां न स्त्री भेग देस्त्रियां द्वयोः कपोलावयवे इति मेदिनीकोशः अतिशायने म-
तुप् हनुमान् अन्येषामपि दृश्यते इति दीर्घः हनूमान् स्वं देहेन वधातीति वधुः
प्रज्ञादित्वाद्वांथवः वधुर्वधूकपुष्पे स्यात् बंधुर्भ्रातरि वांधवे इति विश्वः मनुराद्रिराजो मंत्रज्ञः स्यंदेः स्यंद्यमस्त्र-
वणे उंदेः उंदी क्लेदने ईपोः ईपातिहिंसादानेषु स्कंदेः स्कंदिरगतिशोषणयोः कंडुरितिस्कंदस्य सिज्जनि य
तापइतिवृत्त्याभोगस्यानमिति केचित् अन्ये तु स्कंदति शोषयतीति कंडुर्लोहादिपात्रमित्याहुः अतएव
स्त्रीवेवरीषं भ्राष्ट्रोनाकंडुवा स्वेदिनी स्त्रियामित्यमरः कंडुर्वा ना इति शर्ववर्मणस्त्वया द्वा पुमानित्यर्थः सृजेः
सृज विसर्गे सृजतीति रज्जुः स्त्रियां आगमसकारस्य स्नुत्वेन जः श्वेन जः सृजेरजुम चेति स्रुव च मिति
नव्याः रज्जुर्वेण्यां गुणे च योषिदिति मेदिनी कृते राद्वेति विपर्ययः कृती छेदने तर्कुरिति कृत्यते नेनेति तर्कुः
सूत्रवेष्टिनं यंत्रविशेषः तर्कुरी सूत्रलाता तर्कुरिति हारावली नावंचेऽश्नुगतो मंकूर्मेनोम्रगी पुंसीति॰
मेदिनी कालिपादि फलगतौ वराप्यंतः तमप्रकृत्वेशाहेमतन्नातेजतीमाडुर्भावेणमडः स्यात्तरणषांचय ८१

पाक्रमेगुणागमः पदिनाकिंथत् इत्यादेशाश्च भवंति इह एकापि षष्ठीविषयभेदाद्भिद्यते गुणागमे हि फ
लेरवयद्वषष्ठीयथादेशचतुष्टयविधौ तत्तण्यादिभ्यः स्थानषष्ठी सापि धतयोर्विधौ अत्र तेलसुप संक्रियते
इतिविवेकः अनागमकानामागमकाश्चादेशाइतिपक्षेतु स्थानषष्ठ्येवेति फलवसारेऽभिधेयवत् नदीभे
हेमलघांस्त्री इतिमेदिनी कुर्वल्मीकं इतिवामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकमित्यमरः मध्विति मधु
श्चैत्रे च दैत्ये च मघपुष्परसे मधु इतिहट्टचन्द्रः मकरंदस्य मद्यस्य माद्विकस्यापि वाचकः अर्द्धर्चादिगणपा
ठात्तु नपुंसकयोर्मधु इतिधामश्चवर्तसंवरणे इति दंतोष्ठ्यादिः वल्गुस्याच्छगले पुंसि स्त्रद्वरेवाऽभिधेयवदि
तिमेदिनीयत्तु उज्वलदत्तेन वलेर्गुकु चेति अष्ठ्यादिपठित्वा वलमाणन इत्युपन्यस्तं तल्लक्ष्यविरोधादुपेक्ष्यं
अयंनाभावदतिवलावोगरद्दे इत्यादौ दंत्यौष्ठ्यपाठस्य निर्विवादत्वात् शः कित् भ्रातन्तु करणे अस्माद्भ्रस
यः आदेशाउपदेशा इत्यात्वाद्द्वित्वं संन्यत इत्यभ्यासस्येत्वं आतोलोप इति चेसाकारलोपः श्रिभ्रुः योद्वेचया
प्रापणे कुर्वेश्च भज्ञभधारणे अस्मात् कु प्रत्यये धातोर्द्वित्वं च भरतीति च भ्रुः करणे कोपस्यमाह बभ्रु
रित्यादि च भ्रुर्वैश्वानरे मूलपाणौ गरुडध्वजे विशालेन कुले पुंसि पिंगले त्वभिधेयवादिति मेदिनीकोशः
वादन्यतोपीति भ्रः कुश्चेति वक्तव्ये प्राकृमसयनिर्देशादिसेके भ्रश्च इति प्रकृतिसंस्कृतेन चकारेण प्रकृतमंत

न॰ वो॰ टी॰ ६२

रसमन्त्रचयादिमनेपृभिदिरुपालनपूरणयोःभिदिदिरविदारणेअथताडनेगरधश्रभिकांक्षायांजिघत्सायामा
गल्भेपुरुहरिति कृप्रत्ययेपरतउद्योष्ठ्यपूर्वस्येत्युत्वेरपरत्वेपुरुःप्राज्ञेभिधेयवदितिपुंसिस्याद्देवलोकेचन्द्र
पभेदपद्मरागयोरितिमेदिनीविधुःशशांकेस्यादितिविश्वकोशःइहसूत्रेऽर्थविहिषिभ्यश्चेतिपठित्वाहृषुर्द
र्षःसूर्याग्निप्रधानिराहवोपिकृषवदितिकेचित्त्वष्ठग्नोहत्वद्रुकृत्यकरणेभ्यःप्राहृद्भ्याभ्यांकुःस्यादुकारोन्तादे
शश्चउरणरपरःकुरुर्न्देयांतरेभक्तेपुमान् पुंभूम्निनिवृत्तीतिमेदिनीअपष्ठुश्वगतिनिष्टन्नोसृयामेत्यादि
एतच्चस्यात्स्वापनुरोधेनोक्तंवार्त्तिककृतात्स्यासिन्नस्यनामिस्तुपसंख्यातंअपष्ठुपुंसिवालेचवामेस्या
दन्यलिंगकइतिमेदिनीएषांत्रयाणांमहगणयादिपाठेनसिद्धत्वात्सूत्रमिदंप्रासकारस्यसंमतमितिर
क्षितःप्रतिकूलेअजेरजिअजेनेअस्यजरजिरादेशःरचोःपक्षिरादेशःकमेस्तुगागमअमरोगो
गत्यादौवाअस्यधुगागमःपक्षिनसनेसेत्रोधातुरस्यदीर्घःवाधलोडनेअस्यआदेशःषडभ्योपिकु
प्रत्ययःस्यादित्यर्थःअविशेषेणेतिचादिगणेषुचितिपठितपरशब्दस्यपर्थमव्ययमितिधारणिःकंतुः
कंदर्पःइकेतुर्मकराकरइतित्रिकांडशेषः पांसुरितिपठिपसिनाशनेचुरादिर्दंत्यांतःस्त्रीपुंसयोरि
तिउक्तंत्वमरणेहौपरोढयोःभुजवाहूइतिपरेहौभुजवाहुशब्दौढयोःस्त्रीपुंसयोःस्त्रीपुंसयोरिति

नदर्थः आकारांतोप्ययं अत एव बाहोश्च भुजयोः पुमानिति दामोदरः बाहा भुजे पुमान् मानभेदाश्च
वृषवायुषुविति मेदिन्यां टाचन्तोप्ययं मथिमन्थिदिमथमव्याने मन्थदमर्दनेभ्रस्जपाके मथ्यते इति एष्युः ८
स्यान्महति त्रिषु त्वक्कु यन्त्रां कुलञ्जीरः ष्य पुमानश्चैनान्नपात रेइति मेदिनी मन्दि तंशाकतेश्च कहिनत्वा ८
दिति एष्युकोमलः मगुः मुञ्के मयाते च जमदग्नौ पिनाकिनीति विश्वः लंघिलघिगतौ वहिमहि वृ
द्धौ लघुरिति एकायां स्त्री लघुः क्लीबं शीघ्रे कृस्नागरुएषमीति त्रिकांडशेषः लघुरस्त्री मनोज्ञेनिःसारे
वाच्यवत् क्लीबं शीघ्रे कृस्नागुरुणि च एकानमौषधौ स्त्रियामिति मेदिनीन्नपभेदइति एतेन अवेदस्था
तोर्गमनार्थमर्थविज्ञकारनाम्नार घुमात्मसंभवमिति कालिदासवचनं व्याख्यातं वद्धुरिति वह्रु ८
आदिसंख्यासु विपुलेत्वभिधेयवदिति मेदिनी ऊरुरिति सविर्थक्लीवे पुमानूरुरित्यमरः ऊर्णयते अ
च्छाद्यते इत्यूरुः कर्मणि प्रत्ययः ऊरुर्महदिति कर्त्तरि प्रत्ययः श्लिषेः श्लिष आलिंगने अस्मात्का प्रत्ययः क
श्चाता देश्वानुद्यते इति सद्दिया वत्कार्यं श्लिष्यति लगति व्याप्रियते इति यावत् आङ्‌परः रवनअवदा
रणे अस्य हिंसायां पर्श्वरति पर्श्वः परश्वनासह इति विश्वः हरिमितद्रु गतौ अस्माद्दुरमितियोरुपपादयोः
कुः स्यात्स च डित् हरिद्रुर्द्वत्तु इति दारुहरिद्रइमेकेश्वात्वद्रुर्नदीभेदः शातद्रुस्तु शातद्रुः स्यादित्यमरः त

ह्वानितियुद्धभ्यांमइतिमः खुरः शंकुः खनत्यवदारणेशाकिशंकायांकामइत्यादिसहः पतिंवराकन्येत्य
पिवोध्यंखुरःर्दतेदर्प्यहृयेष्वतेतद्वाच्यवदिति विश्वतिकांडशेषौशंकतेऽस्मादितिशंकुः कीले गरे
शास्त्रेशंख्यापादपभेदयोः पादोभेदेचपापेचस्यानावपिचशपतेइतिविश्वः पीयुरितिपीयुः कालेर
वौघोरेइतिमेदिनीक्रिमिविशेषाइतिनीलंगुः क्रिमिजातोस्यांगुभराली प्रसूनयोरितिविश्वः नीलं
गुः स्यात्क्रिमौपुंसिभंभरालांतयोषितीतिमेदिनीभ्कारः पाठांतरमितिनालंगुरपिनीलांगुरितिविश्वः
धातोरपीतिकेचित्तन्नीलशब्दे उपपदेणमेष्ठिलोपः उपपदस्यमुमदीर्घश्चपाणिकेनिपात्यतेइत्याद
लिगुश्चिनपुंसकमितिचरुत्विः मृगयादयश्चमृगयुः पुंसिगोमायौवाधेचपरमेष्ठिनीतिमृगयुर्ब्रह्म॰
णिख्यातोगोमायुव्याधयोरपीतिविश्वः देवयुर्वाच्यलिंगः स्याद्धार्मिकेलोकयात्रिकेइतिमेदिनी आह्णु
तिगणइतितेनपीलुप्रतिष्टंभेऽस्मात्कुः पीलुर्गजे द्रुमेकांडेपरमाणुप्रसूनयोरितिविश्वः भाष्टाल्क
पीलुशब्दस्यवृत्तेभ्यार्यप्रसिद्धिर्गजेतुम्लेच्छप्रसिद्धिरित्यादिश्रितव्यवजकुः पडिगतौऽस्मात्कुः धातो
र्ह्रस्वपाडुः कडिमदेकंडुरित्यादि वोध्यं मंदिमदिस्तुमादौवापूर्षाहेमथिविलोडनेचतेयाचनेपं॰
कइतिमोत्रोधातवः अकिलक्षणेवाष्पुराणराणात्रिरिति वाष्यंतेऽस्मामितिविग्रहः वाष्पुरो गर्दभइत्य

न्ये चाग्नु एवा सिंतारात्रौरिति मेदिनी हेमचंद्रौ वंकुर इति वंकुरः स्पंदने ह्रदे इति मेदिनी ग्रंकुरो रुधिरे लो-
म्नि पनीः भिनवोद्भिदीति स्वर्ज्जूरादीति कुरुप्रत्ययो पीति भावः ग्रंकुरोऽङ्कुरः एवेति च विश्वप्रकाशः ग्र॰
थेः अथ भय संचलनयोः स्मादुरच् किं त्स्याद्धातोः संप्रसारणं च दशपाद्यां च अर्थेः संप्रसारणं धकिञ्चेति
सूत्रं पठित्वा थकारमंता देशा विधुरोऽनग्निक इत्युदाहृतं माधवप्रसादकारादिभिरपि तदेवानुसृतं तन्नचैत-
युक्तं त्वमेषां विद्युत्प्राणवासिन्नथ विद्धाविधुरेण चिदस्मा इत्यादि मंत्रे पृथकारपाठोस्य निर्विवादत्वात्
यद्यपि माधवेनोक्तं विदिभिद्धिदि रिमत्र थेः संप्रसारणं चेति वचनात् कुरुच् इयां तदूपमिति तदपि स्यवी-
यः कुरच् विधायके सूत्रे व्यथेरुपसंख्यानस्याप्रसिद्धत्वात् तस्मादिह धः किञ्चेति दशपादी पाठ एवोपेक्ष एव
कथं तर्हि विधुर इति प्रयोगस्य निर्वाह इति चेत् धुरो विगत इति प्रादिसमासे नेत्यवधेहि समासान्ता इति सूत्रे
वृत्तिपदं न जर्ज्जाद्यलष्येवोक्तत्वात् इह व्यथेः किञ्चेत्यस्य वाप्त ग्रहिज्येत्यनेन संप्रसारणं स्यादेवेति तन्न भ्रमितव्यं ग्र॰
हिज्यादिषु व्यधिर्ग्गर्णितस्तथानत्वयमिति निष्कर्षात् मंकुर इति मकिमंडने ग्रस्मादुरच् नलोपश्च वाहुल-
कादिनिधातोरुपधायाः प हेत्वकार इति भावः मकुरोपि चेति विश्वः मकुरः स्यान् मकुरवदर्पणे च कुलद्रुमे
कुलालदंडे इति मेदनी धातोर्हि वचनमिति केचित् गुणो दुर्गा ग्रामम् अभ्रनिपात्यते इत्याहुः ग्रामजाले चेति

मामजालेनिपाठांतरंमञ्जरादयश्चमदीहर्षेकर्बुरइति कर्बुरंसलिलेहेम्निकर्बुरःपापरक्षसोःकबु
राकुसवृभायांशबलेरम्यवदितिमेदिनीअतसातत्यगमनेआदिदीर्घःआतुरःवधरवंधुराविति
वंधवंधनेकुक्कुरइतिकुकुआदानेकुक्कुरःकुकुरोमनइतिहरचन्द्रःकुक्कुरःसारमेयेनाग्रेष्यिप
र्णीनपुंसकेइतिमेदिनीवागानितिगंधनयोःगुणग्रामःवागुरामृगवंधिनीइत्यादिरपिज्ञेयः असेः
अहृत्तयएो मसेश्च मसीपरिणामेमसूरसरावामावेश्याव्रीहिप्रभेदयोःमसूरीपापरोगेस्या
दुपाधानेपुनःपुमानितिमेदिनीश्वावधेःश्वइतिकृताआकारलोपःआश्वशाकृसस्मिन्त्र्प
यदे आसौगम्यमानायां अश्रुवामावित्तस्मात्ह्रातोहरनस्यात् शांश्वरोदयितयोःपितापत्योःश्वशु
श्वश्रूःश्वशुरस्तुपितातयोरित्यमरःअविरक्षणादौ महपूजायां अविषइतिराजासमुद्रश्चम
हिषामहान् तुरीयंचमहिषाविवक्षितवतमानीमहिषमन्ववेनादित्यादिमंत्रेष्वितिभावःवैदिक
निर्घंटौअोजःपाजइत्यादिषुवलनामसुतविषीशब्दस्यपाठश्चेहमूलमितिवोध्यम्तविषः
शोभनाकारेभेलोधिव्यवसाययोःताविषीदेवकन्यायांपुंसिस्वर्गेमहोदधौनाविषीचेंद्रकन्यायां
नास्वर्गांवुधिकांचनइतिमेदिनी नजिव्यक्तभयसंचलनयोःकिलेःकिलश्चैतत्क्रीडनयोःअस्मा

द्विषश्च धातोर्बुगागमश्च किल्बिषं पापरोगयोः अपराधेपीति मेदिनी दृषिमोदे दूषद्यायां मदी॰
हर्षेमुदहर्षेस्विददैन्येछिदिरद्वैधीकरणेभिदिर्विदारणेमदिस्तुतिमादौचदिआह्लादितिमश्चा
द्राभावेमिदृस्नेहनेमुहवैचित्त्येमोऽक्षमोक्षणाः चदीमोरुधिरस्यावरणेवंधवंधनेसुषशोषणे
दृषिरीग्निरिति आहारइत्यन्येछिद्रिरः पावकोरजोकरवालेपरस्वधेइतिमेदिनी मंदिरंनारे
क्लीबंनामकरालयइतिमेदिनीचंदिरः नेकपेकद्रूइतिचमिरध्वांतनेत्रामयांतिकेइतिचमि
हिरः सूर्यवृद्धयोरितिचमेदिनीमुदिरः किमेसूरवैयोरितिचसुंदरंरुचिरंचारुइत्यमरः रुधिरो
गारकेपुंसिक्लीबंनकुंकमास्त्रनोरितिमेदिनीवधिरः श्रोत्रेंद्रियरहितः सुषिरंविवरंबिलंछि
द्रमित्यमरः अशोःअप्राभोजमे अजिराअजगतौशसस्तुनगतौष्टागतिरिहन्तोस्कायोर्न्हो
रुदाहिंसायां अजिरमितिदृशपादीत्हन्नौतन्नपूर्वस्सजीर्यतेर्ह्रूवणलोपोनिपात्यतेइत्युक्तं
तदपिग्रास्यंआस्त्रुद्दतमजिरंप्रयत्नपीउनमिमादौनजीर्यतीत्यजिरइत्यस्यानुगणत्वात् अंग
णमिति अंगेर्लुटिश्चनादेशानकारस्सवाढूलकाप्तत्वमित्येके अमेत्तदंतमेवेच्छंतिअजिरंप्रांग
णकायेविषयेदर्दुरः निस्त्रीइतिमेदिनीपिपिरोनादिमेनस्त्रीकस्तनभेदेजडे त्रिष्वितिचविस्र

न्

कोशस्यमाह शशिरं स्यादिति खदिरो वृक्षभेदः खदिरी शाकभेदे स्त्री ना चंद्रे दंतधावन इति मेदि
नी शिविर इति शारत्ते अस्मिन्राजवल्लानि निवेशाः शिविरं खंड इत्यमरः सलिकालिषलशातो
कलसंख्याने अन प्राणने महरजायां भट्टिकल्याणिशानिरू जायां पिंडि संघाते इनेकुकश्चादा लौ
ने भस्मसन्नायां कुटकोटिल्ये कलिल इति मिश्रो गहनश्च कलिलं गहनं समे इत्यमरः महिलेति म
लौ हिमा फलिनी स्त्रियोरिति मेदिनी प्रियंगुः फलिनी फली इत्यमरः एषोदरेति तथा च दमयंती का
व्यप्रयोगः परमहेला रतोप्यपारदारिक इति परस्य महेला स्त्री अथ च परमानुकृष्टा हेला क्रीडा त
त्ररत इत्यर्थः कामेः कमनकांतो अस्मादिलचूप चांतादेशः कपिला रेणुकायां वरिशायागो विशेष
योः पुंडरीक ककरिण्यां स्त्री वर्णभेदे त्रिलिंगकं नाऽनले वासुदेवे च सूनिभेदे च कुक्कुरे इति मेदिनी
रेणुके ह्रलता विशेषः हरेणुरेणुका कौंती कपिला भस्मगंधिनी इत्यमरात् गुपादिभ्यः गुपरक्षणे
तिज निशाने गुह संवरणे मिथिलादयश्च मथे विलोडने अकारस्येत्वं निपातनात् पथ्यगतौ
पति पल्लगतौ कठकृच्छ्रजीवने कुठ अगड सेचने गुड रक्षायां दंश अदने कुरिधातोरिदित्वान्नुमि
शामे आह वाकुलकादिति कुवेकु विश्वाच्छादने अस्येषामेष्वर्यं कुवतीति कुवेरः कुंठेरस्त्रं वकसरवः ४५

शाड्वशातने स्खलप्रतिष्ठायां गुथपरवेष्टने गुडुसंवरणे मुहवैचित्येकचेः कचएणेः कपोतः स्याच्चित्र
कंठे पारावतविहंगयोरितिमेदिनी कपोतः पक्षिमात्रेपीति त्रिकांडशेषः श्वेतश्रोत च श्वित्रं ग्रामादि
कं यत्कपोतः पदमग्नोत्क्रिणोतिदेककयोनइविबोयदिहृतिनित्यादौ सर्वत्रप्रत्ययकत्वमोकठोरः क
ठिनः पूर्णश्चकठोरतनाधिपलंवनछविरितिमाद्यः चकोरः पक्षिभेदः विशारः सृहिंसायां घदसमर्थ
णे किशोरोश्वस्य शावके लेलपणेंषथेचसात्क्रमणाघसस्त्र्येयोरितिमेदिनी कपिगडिकपिचलने
गडुसेचने गडिवदनैकदेशे कंठे वर्षावरणयोः पहगतौ कपाल इति केचित्तस्त्रेकं ठिं पठित्वा कुडि म
दे कं डोलश्चंडालः चंडालिकात्तु कंडोलवीणा चंडालवल्लकी स्यमरः पटोल इति पटोलं वस्त्रभेदे नौषध
धौ ज्योत्स्नात्तु योषितीतिमेदिनी वल्लप्राद्येवाद्युल्कादतोप्यालच्च कल्लोलः पुंसि हर्षे स्यान्महत्सूर्मिषु
वारिण इतिमेदिनी स्यंदेः स्यंद्र मस्त्रवणे सिंहूरस्तरुभेदे स्यात्सिंहूरं रक्तवर्णके इति मेदिनी विस्त्रप्रकाशे सि
तनिषिजत्वं बंधने तेनु विस्तारे गम्लृ गतौ मसी परिणामे षच समवाये ग्रच रक्षणे हेडु धान्ज्र धारणे पोष
णयोः क्रुशांश्वाक्रोशे पाशेत्तुनालो नु मारवके इति मेदिनी सूत्राणि कटितं तव इत्यमरः सेतुः साले स्त्रियां
पुमानित्यमरः मंडं दधिभवे मस्तु इति च धातुना इंद्रियेषु च शब्देयोनि महाभूततन्तुणा षुरसादिषु म
नः पिलादौ श्लेष्मादौ विशेषाद्गोरिके जस्य च इति मेदिनी श्लेष्मादि रसादिकादिमहाभूतानि तद्गु

नं.वो.
टी.
७६

णाः इंद्रियाणांपक्ष्मविकृतिः शाख्योनिस्त्वधातवइत्यमरः यत्किंच पापाने अस्मात्तुनस्य चकितं किंवा
युमास्येतीतं अर्त्तिस्त्रतुः अगतौ तेतनिमकृते अंतोदात्तार्थात्तुः केयते अतनायय अतर्जनीनामि
त्यादिअतवर्षादिषष्टूच अर्द्धावभासि च पुमान्नितिमेदिनी अतुः स्त्रीकृत्स्नेपि चेत्यमरः कमिस्तु
निकमनुकांतौ ममज्ञाने जननीप्रादुर्भावे गैयाहे भाटी श्रेपापाने ह्निगतौ कमिग्रहणं प्रपंचार्थं अर्जिदृशी
त्यादिना कुप्रत्ययेतु किंसिद्धत्वात् मंतुरिति मंतुः पुंस्यपराधेपि मनुष्येपि प्रजापतौइतिमेदिनी
गातुर्नाकोकिलंभंगंधर्वेत्रिषुरोषणे इतिमेदिनी भानुर्भाकिरणे सूर्येइतिचचायः किःवाणएरजाति
शामनयोः अस्मात्तुधातोः किरादेशश्चकेतुर्नेरूकन्न नकारिअहोसातेषुलक्ष्मणीतिमेदिनी आप्नोतेः आ
प्तृव्याप्तौ आप्नुः शरीरमिति अभिलषितार्थस्य आप्यस्यातः अत एव यागविशेषवाचकस्य आप्नो
र्यामशाद्रस्याभिलषितार्थप्रापक इत्यवयवार्थमाहुः वसेः वसनिवासे कृजः डुकृञ्करणे कृतोः किंवा
न्नुणाभावेयणादेशाः अतवर्यज्ञेमनौपुंसीतिमेदिनी एधिवक्षेश्चतः राथहृद्धौवहृप्रापणे चिंतादंतो
दात्तः स्योनं यवहृतं कृणं षावद्नुः पथिकेवृषभेमनु मातिमेदिनी जीवप्राणधारणे आतृकतृ जैवातृ
कः पुमान्सोमेकृषकायुष्मनोस्त्रिषिनोस्त्रिषितिमेदिनी कृषिचमिकृषविलेखने च मनुअदनेतनुवि
स्तारेघनधान्येरभसकोशास्यमाहृकर्षः पुंसीत्यादिकर्षः पुमान्करीषाग्नौ स्त्रियांकुल्यास्यात्तयोरिति ७६

मेदिनी चमूः सेनाविशेषे च सेनामात्रे च योषितीति मेदिनी स्त्रियां मूर्च्छिलन्तु स्तन्नूनि समरः सर्जूर्वनि॰
ज्जिविद्वनिस्त्रियां सर्गेविधौ रुद्रे इति मेदिनी खर्जूः कीटोत्तरेन्नतौ खर्जूरी पादपे स्त्री द्रुममिति च मत्तोः म
नूष्पद्रौ अस्मादुः स्यादाद्यापाराद्येपगुणश्च मर्जूः स्त्रीम्पुद्वेधावकेपि चेति मेदिनी वहोऽधश्च वहमापने वधूः
स्नुषा नवोढा स्त्री भार्या पत्न्यंगनास्तु चेति विश्वः एकामहिला च वधूरिति त्रिकांडशेषः कषेश्च कषशि
षेनिदंडको हिंसार्थेऽस्मादूः स्यान्तश्चांतादेशः कंछूस्तु पामपामा विचर्च्चिके त्यमरः णिन्तः सिकसगतौ प
दगतौ अरगतौ कासृ विकलवास्यस्यान्तथा शल्यायुधे स्त्रियामिति मेदिनी कासूः शक्त्यायुधेरुजि बुद्धौ वि
कलवाचि स्यादिति हेमचंद्रः अणो रु श्च अणदंडकशदार्थः अस्मा इस्मान्त्सचणित उश्चांतादेशः न
ञ्जिलंवेः लवि अवस्त्रंसनेन लंवते जले इस लाबुके स्त्रः शृं हिंसायां त्रोऽड् चतः लवनतरणयोः तर्हूरि
ति नेड्डुष्टीति नेड्वरमनादावितिपरिगणनं तु वाहुलकान् श्रीयते इस्मादुः केचित्तु डभावयत्रोडुक्के
ति पठित्वा धातोर्ईगागममाहुस्तेषांतु धातोर्गुणे वुर्लभः इगागमास्र्वेयत्मामंतदपि भवतीसंबंधकार
वलेन व्याख्यायवागुणः साधनीयः दरिद्रातेः दरिद्रा दुर्गतो इश्च श्वाश्चेति भोजदेवस्त्रु यलोप इतिरेफादि
कंपदं छित्वा वधेधाव्याख्यत् रश्च श्वाश्चेति व्याख्यानेदन्नुः रश्चइश्च श्वाश्चेति व्याख्यानेनु अस्मवाधेन्नस्तदे

नै॰ टी॰
नी॰
७१

घ्रासलोपस्य द्वितीयस्यैव रेफस्य लोपात् दृहूरिति मरगच्छादित्वात् कुमस्ययेद दुरित्यने दद्रुणा दद्रुरोगी
स्यादित्यमरः इत्थं चत्वारि रूपाणि भविष्यन्तीति विक्षेपे अधुशाद्वकुत्सायां अंद्रद्रु दर्भः आदिवंधनेनतिरूप्रथ्योः
कुरित्यऋरिग्रहणं नकृतं वैचित्र्यार्थमित्याहुः लब्धाशनेक फरुर्वः दुधान्नधारणपोषणयोः कर्पररुर्वैषां
तकर्मणि दधिरुर्वः घतं च अग्रदुर्वुधनमिति अग्रूः स्त्रियांस्यात्त्रिगंडे प्रभेदे भूषणस्य चेति मेदिनी अं
दुकोहस्तिनिगडे इत्यमरः संज्ञायां कन्कोण इति ह्रस्वः केचित्तु अमगतो अस्यदुःख कु अंहूर्वु द्विरिति
व्याचख्युः द्वितीयं ग्रंथेति नंदादिरयम् इहभवतीति द्वंभूः संदर्भकर्त्रेत्यर्थः कथक इत्यन्ये केयदमता नु
रोधेनास्याः रूपाणि दृन्कवदित्युक्तं माधवादयस्तु दृढशब्दे उपपदे भुवः कुप्रत्ययः उपपदस्य दृन्वादेशोनि
पात्यते यद्वा दृढार्थक दृन्निति नांतमव्ययमुपपदं दृन्भूस्तु सर्पः कर्पिर्वेतिव्याख्यायदृन्करेतियणेव
षांभूवद्रूपमस्येत्याहुः ह्रस्वोपीति अत एव विक्रमादित्येनोक्तं तस्या जंवोः फलरसैर्नदी भूयप्रवर्तते
तिके चित्तु परिणतजंबुफलोपभोगहृष्टा इति भारविप्रयोगं ह्रस्वात त्वे साधकत्वेनोदाजकुस्तन्न ह्रको
ह्रस्वो अग्र इत्युत्तरपदाधिकारस्य ह्रस्वविधायकसूत्रेण गतार्थत्वात् दिधिमितिकिचित्तु दधाते रित्वं द्वि
त्वं षिक्च निपात्यते दधात्यस्यो दिधिषूरित्याहुः पुनर्भूर्दिधिषूरूढा द्विरित्यमरः द्विरूढा द्विवारं विवाहि ७१

तेस्यार्थः उज्ज्वलदत्तोक्तपाठमाह केचित्तु नंवितिएतच्चकैयटमाधवादिग्रंथविरुद्धं अत एव हृन्मूः स्त्री
पर्यंचक्रयोरितिभानेमेदिनी म्रग्रोः म्रडु॰ प्राणित्यागे — निगरणे आभ्यामुरिति कारस्तकारस्येत्संज्ञा
परित्राणार्थः मरुदितियवादिरयंतेनेस्यास्मरस्यमस्त्ऊयद्रमनेनेनवत्वंनमरुत्मान् गर्मुदितिग॰
र्मुत्स्त्री स्वर्णेलभयोरितिमेदिनी इषेः कृषत्तुरुष्टौ मज्ञादित्वादणिमारुतोपिमरुतशब्दोप्यस्मुत्नोस्ति
तथाचविक्रमादित्यकोशः मरुतस्पर्शनप्राणः समीरोमारुतोमरुदितिकोयंवातिसदादित्वाणात्मरुत
इतिकवि राजश्लोकोऽनुपपन्निमत्वादस्त्विणात्पवनइतिपाठं केचित्कल्पयंतस्तन्मरुत्स्थानइतिवर्ण
विवेकः मरुदिति चटज्जेरितिकटेवर्षावरणयोः हृस्टहृन्म्रहरणोस्टगतौ हृदजन्मनिविप्सकोशस्यमा
दृहृरिद्हिशिस्त्रियांपुंसिहृषवर्णविशेषयोः अस्त्रियांसान्नणेवेतिमेदिनीऋतशासेतिएतेनगतंरोहिद
तारिरमयिपुमरएत्वपुषेतिपुष्पदंतप्रयोगोव्याख्यातः रोहिन्नरग्यांलतानेदस्त्रीनार्क इतिमेदिनी
ताडेः तडआघातेएयतेः तडित्सौदामिनीविद्युदित्समरः शामउपशमनेवाहुलकादितियद्यपिनेडूाशि
क्तीत्मनेनैवइडभावस्यसिद्धत्वादिड्ढनेनेस्येतदयुक्तंतथापिनेडूरमनादावितिपरिगणनाद्रुकुलग्रहण
माश्रित्सैवइडभावोपिसाधितः छांदः स्यात्सुसिगोपतौ आक्छतिशंडेवर्षवरे त्वतीयंप्रकृतावपीतिमेदि

नीकमेः कमुक्रांतौ कमठः कच्छपे पुंसि भांडभेदे नपुंसकइति मेदिनी उदरइति जूवयोर्हानौ जरठः कठि
नेपांडौ कर्कशे स्यादभिधेयवदिति विश्वमेदिन्यौ जरठः कठिने जीर्णे इति वैजयंती रमेः रमुक्रीडायां शमेः
शामउपशमे शंखो निधौ ललाटास्थिकंबौ नयोषित् भालास्थनि दधिभिन्नखे इति मेदिनी कणेः कं
ठो गलेसंनिधाने ध्वनौ मदपे इति विश्वमेदिन्यौ कलः त्वपमीणने फलत्रिक इति त्रिफला त्रिफलाव
सेति विश्वः त्रिफलशाट्समनार्थस्त्फलाशाट् इति द्विगोरिति स्त्रत्रे रक्षितः शायेः शापश्राक्रोशद्यादि
भ्यः त्रपुसेचने फलगतौ स्तगतौ तृसवनतरणयोः शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाइत्यमरः
वृषस्करगेशूद्रे इति हेमचन्द्रः फललं तिलचूर्णे च पिकेभ्यासे नपुंसकं वाराहसे इति मेदिनी कलमस्त
यस्पकित्वादाहवाहुलकादिति सरलः पूतिकाष्टेनाचोदारावयोस्त्रिषिति मेदिनी सरलाविरलीयं
ते घनायंते कलिद्रुमाः नशमीनचपुन्नागोऽस्मिन्संसारकानने इति इत्यभियुक्तप्रयोगः कमेः कमकां
तौ अस्माहृषादित्वेन कलमस्तयोवाहुलकादिमनुषज्यते इति वृक्षः कंवलो नगराजे स्यात्सास्नाप्रावार
योरपिकृमावप्युत्तरासंगे सलिले तु नपुंसकइति मेदिनीः मुसलं स्यादयोग्रे च पुंनपुंसकयोः स्त्रि॰
यां तालमूल्यामाखुपर्ण्यां गृहगोधिकयोरपीति मेदिनी मूर्द्धमप्यधोप्ययमिति वर्णादेशनामुशाखं

डुनेइतिधातोर्द्दत्यांतेपुमू ईत्यांतेषु चबोपदेवादिभिः पठितत्वात् पुंजलदन्नादयस्ततालबमध्यमपा
टुः अतएवंमसलोपिचेतिविश्वकोशेमशलोपिचेतिपाठान्नरलिंगेः लगिगंताविसस्मात्कलमसये॰
वाटुलकादत्तनुंषगाद्दद्विरितिभावः एवमग्रेपिसडागमे वाटुकादेवकुटिकशिकुटकौशिलेकशगति
शासनयोकुशाट्टेअस्मात्कलमसयेगुणोनेसशंकाकाहवाटुलंकाद्तिकोमलस्टुलंमर्डुमर्टुवाटुलं
कादसत्रापिबोध्यः वयथाकुपसश्चेषणेदंसांतोयंबोपदेवमतेनतालव्यांतोपिगुणः कोशलः कोशलोवा
देशविशेषः वृद्धेत्कोसलेतिसूत्रेनुदंसांतएवसांमदापिकः संवसंधोषांवचसंवलंशंवलंशवालोत्तीलंव
लवत्कुलपाथेचमत्सरेइतिमेदिनीकदिग्धाद्धानेनलोपः कौरादित्वान्ङीपिकदलीमंदांदोलितकर्पूर
ककदलीदलसंज्ञायाविद्यामापश्रमापन्नानाद्वयंतीइवाध्वमानिति काशीखंडः अजादेराकृतिगणत्वादा
वपिकदलाहदलैाएएयांकंदलीकंदलीपुनः रंभावृद्धेषकदलीपताकामृगभेदयोः कदलीविंचिकायां
चेतिमेदिनीकुशाइतिसौत्रोधातुः कुशलः शिक्षितेत्रिषुहेमेचसुकृतेवापिपर्यायेमाचनपुंसकइतिमेदिनीक
मकांतौकमलंसलिलेताम्रेजलजेव्योम्निभेषजेमृगभेदेतुकमलः कमलाश्रीवरस्त्रियोरितिविश्वमेदि॰
न्योमडिभूषायांमंडलंपरिधौकोदेदेशोद्वादशराजकेइतिमेदिनीकोठामंडलमित्यमरः विवोस्त्रीमंडलंत्रि

त॰बो॰
नी॰
७५

षितिचमसजेः सजूस्त्रहैामलोः स्त्रीयापविट्किटे कृपणेत्वभिधेयवदितिमेदिनीचुपेः चुपमंदायांगतौचप
लः पारदेमीनेचारकेप्रस्लरांतरेचपलाकमलाविद्युत्सुश्रलीपिप्पलीषुचनपुंसकेतपीद्ग्रेस्याद्वाच्यवत्त्र
रलेचलइतिमेदिनीशाकिशाम्योः शल्कःशाक्कोशामउपशामेशाकलंखंडेरोहितादीनांत्वचिचतद्योगात् शाक
लीमत्स्यः मत्स्यान्त्वशीकलानिति भाष्यंशाकलंत्वचिरवंडेस्याद्रागवल्कनिवल्कलेइतिमेदिनीछोगुकूछोछे
दने छगलंनीलवस्त्रेनाछगेस्त्रीटृद्धदारकेइतिमेदिनीममंताडुःजमितिप्रत्याहारःदमउपशामरमक्रीडा
यांएवन् अवदारणोमसुज्ञानेवनसंभक्तोअमगत्यादिषुषणदानेगम्लृगतौचणदानेपणव्यवहारेस्तैाच
काष्ठिकायांनुत्रिभ्यः एकणमाः सुरिसुञ्जनमप्रत्याहारल्कनस्त्रीकृतः अष्टाध्यायांतस्यविषयाभावात् दंड
इतिवाडुलकचुटूइतिमेत्संज्ञादंडोःस्त्रीलुगडैपिस्यादित्यमरः रंडाभूषकपर्णीचविधवायांचयोषिति खंडो
स्त्रीशकलेनेद्गविकारमणो मंदयोः मंदः पंचांगुलेशाकभेदेक्लीवंतमस्कनिवंडात्तयोःहलायांस्त्रीत्रिषुह
स्त्रादिवर्जिते अमत्निसंप्रयोगयांति अनेनेति अंडःमाणपवषवः षंडः पद्मादिसंघातेनस्त्रीस्यात्गोपतौपुमा
न्पशाडिरुजायामस्माद्वात्रिंशोडः तालव्यादिरपिसंघातेवर्त्ततेइत्साशयेनमतांतरमाह तालव्यादिरित्यप
रेइतिगंडः स्यात्सुसिखंडितिचिह्नवीरकायालेपुद्गयंभ्रषणवुडुदेवंडोनातिणीहृदोयमकिंकरदैत्ययोःचंडी ७५

कात्यायनी देव्यां हिंस्रां कोपनयोषितोः षंडः शंढे धियेस्त्री स्यादिति मेदिनी इति फण गतौ फंडः मंडादित्वा
दणिफंड मुदरंडकादिभ्यः कित्व कुण शाठ्योपकरणयोः कुण्डमिति कुण्डमित्यत्र प्रायेणानुस्वारमेव लिखं
ति तन्न प्रमादकृतमेवमन्यत्रापि वोध्यं ऊ स्पकित्वान्न गुणः अनुनासिकस्य क्विझलोरिति दीर्घस्तु न भवति
वाडुकान्तसंज्ञापूर्वकविधेरनित्यत्वाद्देमाडुः कुण्डमग्न्यालये मानभेदे देवजलाशये कुण्डी कमंडलौ जा
रात्पतिवत्नीस्तु न पुमान् विंवरेत्तु ननाइति मेदिनी अमृते जारजः कुण्डः पाम्यते भर्त्तरि गोलक इत्यमरः काऽ
एडमितिकमुकान्तो अनुनासिकस्येति दीर्घः काण्डो स्त्री दण्डवाणवर्गावसरवारिषु इत्यमरः अर्वाकुत्सि
तः अत एव काण्डस्तम्बतरुस्कंधे वाणोऽवसरनारयोः कुत्सिते हृच्चभिन्नाडा हृदे रहस्तिन स्त्रियामिति मेदि
नी गुड अव्यक्तेशब्दे गुडो गोलेक्षुपाकयोरित्यमरः गुडास्तु हीतद्वत्केशायस्य गुडाकेशः शिवः जटाधारि
त्वात् गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः गुडास्तु संाचके षता गुडिकायां च योषितीति मेदिनी गु
डाका निद्रा तस्या ईशः इति वा जितेन्द्रियत्वादिति भावः स्याच्चष्टागतिनिष्टत्तौ चते याचने मज्जूष्णुहेलचा
सिद्दे आलच् आकारश्चिन्त्यप्रयोजनः चित्स्वरवाधित्वाच्चादे आद्युदात्तोप्ययमित्येके स्यालं भाजनभेदेपि
स्थाली स्यामादले खयोरिति मेदिनी चात्वालो यज्ञकुसादर्भे चेति विश्वः मार्जालीयः स्मृतः शूद्रे विडाले

न॰वे॰
टी॰
५॰

कायशोधनेइतिमेदिनीपतितंचंडिपन्नगतौचंडिकोपेपसंतस्मिन्नधर्मतिपातालंउपधाहृद्धिःअधोभु
वनपातालवलिसद्मरसातलमित्यमरःपातालंनागलोकेस्याद्विवरेवडवानलेइतिमेदिनीचंडालइति
इत्वान्तमिश्रद्रपथत्वाभावात्तृद्धिःमाधवेतुपतितंचंडिभ्यामालत्रितिनितंपठित्वापातालशब्देवाकुल
काद्दद्धिमुक्त्वाहृद्यर्थमालजितिकेषांचित्पाठेतुचंडालशब्देपिहृद्धिःस्यादिलुक्तेतदनिरभसात् एके
इतिउ—लदन्तादयःएतच्चकुलालवरुडकर्मारनिषादचंडालमित्रामित्रेभ्यश्छंदसीतिचंडालात्स्वार्थे^
अणंविस्थादार्त्रिकेननज्ञाप्येणचसदविरोधमितिवोध्यं तमिविष्ठानमुकांक्षायांविशप्रवेशने विड
आक्रोशेमएादिंसायांकुलसंस्त्यानेकपेचलनेनिर्देशात्तलोपःपलगेतौ पथिविस्तारेतमाम्लास्ति^
लकेखड्गेतापिच्छवरुणद्रुमेइतिमेदिनीविशाविड्वारुएपास्मृज्ञपिस्मात्तयोषितिनत्पकृत्तभिदोःपुंसि
एथुलेयभिदेयवदितिमेदिनी विडालोनेत्रपिंडेस्यात्पषर्दशककेपमानितिचमेदिनी ओतुर्विडा^
लोमार्जारोएषदंशकआखुभुक्मित्यमरः मृणालंनलदेक्लीवंपुनपुंसकयोर्विशे इतिमेदिनीकुल
लःकक्रुभेकुंभकारेस्त्रीत्वंजनांतरेइति चमेदिनीकुलालोधूकपक्षिणिकक्रुभेकुंभकारेचेतिहेमचंद्रः
कपालोःस्त्रीशिरोस्थनिस्यात्घटादेःशकलेव्रजेइतिमेदिनीविश्वप्रकाशैा पंचालीपुत्रिकागीस्मोःस्त्रि ५॰

यांपुंभूम्निनीवृतीतिमेदिनीवाहुलकात् प्रपतेरपिकालन् आदेचउपदेशेइत्यात्वं शाला शलच
चने अस्मायन्निशालासेनासुराछायाशाला निशानामितिपातनात्क्लीबत्वमितिन्यासः शालाद्रुस्कं
धशाखायां गृहेगेहैकदेशयोर्नाऋषभइतिमेदिनी पतेरंगंरचूपल गतौपक्षिणीसुपलक्षणंपतंगःश
लभेशालिप्रभेदेपक्षिसूर्ययोः क्लीबंसूतेइतिमेदिनीसूनेयारदइत्यर्थः तरन्माश्रूलवननरणयोः लू
न्छेदनेतरंगमूर्मिः तरंगस्तुरंगादीनामुत्फालेवस्वभंगयोरितिविश्वः लवंगंदेवकुसुमेप्राक्कृतिगणोयं
विडादिभ्यः विडआक्रोशेशस्त्रदर्षोदन्तःवित्तेपेणभंगागच्किन्त्स्यात् विडंगस्त्रोषधिविशेषइतिउज्वलदत्तः
विडंगः कृमिसंघघ्नेविडंगोनागरेन्यवदितिविश्वः विडंगस्त्रिषुभिज्ञेस्यात्कृमिघ्नेपुनपुंसकमितिमेदि
नीमृदंगः पटहेघोषेइतिचक्रुरंगोमृगविशेषः वाहुलकादुत्वंचेतिकुरुंगश्चेद्रइत्स्मादंगच्चन्तस्यकित्व
नगुणाभावइत्यनेसुर्वजोः सृगतौगौरज्ञवर्णेसारंगः पुंसिहरिणेचातकेचमतंगजेशवलेत्रिष्वितिमे
दिनीवाहुलकात्पत्वं प्रथनारंगः पिप्पलीरसेयमजमाणिन्निर्धिरे नागरंगनागुमेपिचेतिमेदिनी गम
गम्लृगतौ अदभक्षणेवाहुलकाद्भगमासाद् असमादपिगन् अगगात्रेषुउपायेचप्रतीकेवाप्रधानके
अंगोदेशविशेषः स्यादंगासंबोधनेव्ययमितिविश्वः अंगंगात्रेप्रतीकेपापयोः पुंभूम्निनीवृतिक्ली

वैकत्वेतत्प्रधाने त्रिष्वग्रगवदिति चांतिके इति मेदिनी छागः छो छेदने छ्र पवने खभेदने वायते छिद्यते
यज्ञार्थमिति छागः स्यतेर्गः खमनेनेति खगः खगस्क कं सुके शं देइति मेदिनी द्रोगंडकः शृंगे स्यात्त्रिषि
ष्टेगंडके पि चेति शाहृतरंगिणी खड्गो गंडकः शृंगासिबुद्धभेदेषु गंडके इति मेदिनी भजः तुदस्वधारण
पोषणपोः किदित्यनुवर्त्तनात् किन्नूहणमिदृस्पष्टार्थं भंगाय स्यात् विद्वयोः मधुव्रते भृंगराजे पुं
सि भृंगं गगुडत्वचातिमेदिनी शृणाते शृहिंसायामस्मादुनन्धातोः हस्वत्वंमस्मयस्य तु कित्वं न शृंगं प्रभु
त्वे शिखिरे चिह्ने क्रीडाम्बुयंत्रके विषाणोत्कर्षयोश्चापि शृंगः स्यात्कूर्चशीर्षके स्त्री विषायां स्वर्णमी
नभेदयोर्ऋषभौषधाविति मेदिनी शृंगं गोविषाणमात्यातं शैलाग्रे जलयंत्रके मीनौषधिः स्वर्णनाभे
दे शृंगी प्रयुज्यते इस्तु पत्नुलिनीकेशः गणशकुनोः शृणातेः शकुनो वाच्यगणः स्यात्रसन्नु दूग्रवोञ्जिण
तीति धातोर्वः छिः शाङ्गः पक्षी शाङ्गः धनुरिति शृंगस्य विकार इति वो धर्मस्त्वदिग्रोः मृदंगईषेगरनिगरणे ।
ग्राम्यं यथासंख्यं गानगाइत्यनौ स्त्रः मृदुः स सभेदः गंगोमत्रनिविशेषः गंडुरनडुरुत्र करणस्य गतौ भ्र
मुभरणे करंडे षुदलादके इति मेदिनी वरंडोप्यंतरावेदी समूह मुखरोगयोरिति विश्वमेदिन्यौ वा कुल्लका
ष्ठेल्लवननरणयोरित्यस्ता पित रंडोवडिशीस्त्र ब्रह्महका शदिके स्वेइति मेदिनी शृहद्हिंसायां हविदार

णे भस्मभर्त्सीनदीमोः शरत्स्त्रीवत्सरे ऋत्वोदरत्स्त्रियांप्रयानेचभययर्वतयोरपिभस्त्वस्त्रीभास्वरेयोना
वितिमेदिनी उवेश्यंवस्त्वलाभिकइतिमंत्रव्याख्यायांतसङ्गइतिवेदभाष्य जाचन्यापत्नीसंयोजयंतिभ
सद्दीयाहिस्त्रियइमत्रभसज्ञाघनमतिव्याख्यातारः द्दएणतेःदविदारणेटष्यन्निष्येषणेशिलायदश्र॰
लरयोःस्त्रियामितिमेदिनीस्पजिसजहानेतन्तुविस्तारेयजदेवपूजादोस्पदिसादि अदेर्डिज्ञादिलो॰
पःएतेःइएगतै अस्मादटिसत्सत्वदिगुणःएतदसंज्ञेःस्रगतेलघेःलयिष्ठोपषणेपारयतेःपारतीर
कर्मसमाप्तौचुरादिःपारगितिणिलोपःकुत्वंमथःमथप्रलानेभियःजिभीभये पुष्पसि असद्दीपणे।
अर्त्तिसृकजगतोपुत्रःसृत्तौपुजभिषवेदुदानादमयोः त्रसगतैधत्रधारणेह्वितयेदुकृपाहेमादीमे
याप्रायणेवागतिसंधनयोःपद्गतोणीत्रप्रापणेसोमस्तुहिनदीधितोवानरेकुवेरेचपितृदेवेसमीर
णेवसुप्रभेदेकर्पूरेनीरेसोमलतौषधा वितिमेदिनीहोमइतिदेवताद्देशेनहविःप्रक्षेपः धर्मोःस्त्रीपु
एप आचारेस्वभावोपमयोःक्रतोअहिंसोपनिषन्न्यायेनधर्न्तुयमसोमपेइतिचर्मपुम्पयनेम्पायेस्वभा॰
वाचारयोःक्रातोइतिविश्वःहोमपरेदुह्रूलेःस्त्रीहोमंवल्कलजांशुकेशाणजेदुनसिजेइतिमेदिनीभा
मः क्रोधेरुचौदीप्तौइतिचयामस्त्वपुंसिप्रहरेसंयमेपिप्रकीर्तितइतिचवामयनेपुंसिहरेकामदेवेप

नै॰ वो॰ नी॰ ५२

योधरेवल्लुइमतीपस्यवेषुनार्योस्त्रियामथवामीश्रृगालीवड्वारासभीकरभीषुचेतिपद्मोस्त्रीपद्मकेश
हनिधिसंख्यांतरेंवुजेनानागेइतिचमेदिनी पद्मस्त्रायामिति अथमंतस्यादिःमनिन्प्रत्ययेतनकारांतः
शाहःक्षयःशोषस्तद्यस्माचेत्यमरः राजयक्ष्मवरेगाणामितिमाघः यद्मणापिपरिहाणिरायधाविति
रघुः अत्रजकारयकारयोर्भेदाग्रहेणजतभलहसनयोरिसुज्वलदन्ने नापमस्तंतत्वतस्यचवर्गतृतीया
दित्वात् अतएवअहीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुकादधिःयक्ष्मसर्वस्मादितिमंत्रेयक्ष्मशाहस्या॰
तस्यादित्वंजदाक्कीडन्नरममाणइत्यादिमंत्रेतुयक्षशाहस्यचवर्गतृतीयादित्वेचेटभाष्यकृतेयाचख्युःने
मःकीलेऽवधौगर्भेमकारेकैतवेपिचेदितिमेदिनीनेमस्त्वर्थेमकारगर्त्तयोःअवधौकैतवेचेतिहेमचन्द्रः
जहातेःउहाकुसागेजिस्त्वइतियत्प्रत्ययस्यसत्वात्हित्वेसस्वत्हित्वेसमत्इत्वंजिहास्तकुटिलेसंदेस्त्री
वंतगरपादपेइतिमेदिनी अचेते अववरक्षणादौ अंगप्रसंगीहतोरोषेइतिविश्वः अमेवाचग्रस्तअदने॰
अतोमनधातोणकारश्चग्रामःस्वरेसंचसयेवृंदेशब्दादिपूर्वकइति वेदविश्वःशब्दादिपूर्वकोग्राममथ
होह्रदेशवृग्रामोगुणग्रामइतियथाशब्दादिपूर्वोवृंदमपिग्रामइत्यमरःसंघर्वोयंप्रपुत्रेतइक्तसंघर्वःसं
घुगोस्म तइति अविसिवि अववरक्षणादौषिमृनेतुसंतानेषिजवंधेस्तुषशोषणे एभ्योमन्स्मात् सच ५२

किल्कुद्दादिकं पूर्ववत् जयं नशरमिति त्वेकं त्वमिति मंत्रे जना स्तपंका यजमाना इति वेदभाष्यं दापि वाहुलका
त्तक्कस्वते उमा उमातसी हैमवती हरिद्रा कांति कीर्त्तिषु त्विति मेदिनी स्तुमो रश्मिमरिति स्तूत्रं तं तन्निमन्येसिमः स
र्वनामगणे पठितः पुष्यंते जसि येना इति मेदिनी पुष्पं वलमिति वेदभाष्ये इषियुधिइषमतिर्हिंसादानेषु
ईषगतादाविति केचित् ईष्म: युध संप्रहारे ञिइंधीदीप्तौ दम्रउपक्षये शेप्टु गतौ पू ज कंपने शृ प्राणिग
र्भविमोचने युध्म इति युध्मो धनुषि संयुगे इति मेदिनी दस्मस्तु यजमाने स्यादपि चौरे हुताशने इति च त्रिपुस्सा
मो हरित्कस्सोमपा मा स्या ज्वारिवानिशा तमरः सोमपा मोक्ष्येम यागस्य वारिदे द्रुद्रि दारके पिके च क्लूसद्दरितो: पुं
सिस्याद्धरितिपुमरी चेसिंधुलवणे क्ली वस्त्री शारिकौषधी अप्रक्तः ताम नाया च प्रियागावपि गुणे लो यमस्तुना
यांत्रिषामा यांकृसत्रिहरित्रिकौषधेः नीलिकायामिति मेदिनी ईर्ममिति ईरगतौ व्रणोऽस्त्रियामीर्मम्भरः क्ली
वे इस्समरः बाहुलकाज्जनजनइ स्मस्मादपि जन्मरू दवी जजन्मनी तिनि दैषान्मनिनं ते नाप्यक्लिसतं नातः जनजं
न नजन्म नामसमरः अकारांत नकारांतो भयसाधारणः युजि युजिरू योगे रुचदीप्तौ तिजनिशाने एभ्योम
क्रू कवर्गस्यांता देशः रुक्मं तु कांचने लोहे इति विश्व मेदिन्यौ तिग्मं तीक्ष्णं दंते: दनुहिंसा गमोः रस्मान्मक धातो
र्हिंसा देशाश्चदिग्मं तषार मलयो भवयोः स्यान्नपुंसकं शीतले वाच्यलिंगमिति मेदिनी भित्तः त्रिभीभये विभेतस्मा

नै·बो· नी· ५३

दिति विग्रहः भीष्मोगांगेयघोरयोः भीमोम्लवेतसे घोरयाशंभौ मध्यमपांडवे इति च मेदिनी घर्मः यत्नरणदीप्तोः
ग्रीष्मः ग्रसदने घर्मः स्यादातपे ग्रीष्मे पुंस स्वेदांभसोरपि ग्रीष्म उष्मर्त्तुभेदयोरिति च मेदिनी प्रथः प्रथमप्रख्या
नेषितान्द्वीपः पृथिवी पृथिवी एर्व्युर्वरा सर्वंसहा रसेति शाश्वतः अभ्रू प्रुषि अभ्रूव्यामोवटवालेकण
निमीलने खट्वाकांक्षायां विशरप्रवेशने अश्वः पुंजातिभेदे चत्तुरगे च पुमानयमिति मेदिनी अश्वः पुंभे
दवाजिनोरिति विश्वः लङ्काकरंजभेदे स्फालस्फले ऽवचोत्स्वगांतरे इति विश्वमेदिन्यौ कथं पापेमुनौ पुंसीति
मेदिनीकि एवं वा ज्ञायसी घुष्व इति च ख्यातेप्रायनार्थिभिः कांक्षते: तिवृक्षा विश्वायतिविषायां स्त्रीजगति
स्यान्नपुंसकं नानाश्रंभ्यां सिसिदेवप्रभेदे त्रिविष्टिति इति मेदिनी इएड इए गतोप्रीड़ स्वमेपठगतो ढंक जस्पर्धायां
प्राहे च ओहाक्त्यागे इति धाढ्रूसप्राहेत नशाहोत्र कर्त्ववाचीस्याद कर्त्तरीति निपात्यंत इति चन्यमत्यंतये
तिशेषः ह्रस्वइति ह्रसोल्पकृतवर्वयोस्त्रिष्विति मेदिनी शावयद्ध एतेवल्पमत्ययांतनिपात्यंते अतोदान्तार्थमिति
इएरपीभ्यामित्यनेन आयुदात्तत्वसिद्धेरिति भावः प्रीड़ स्वप्नेपेवालिंगाकृतिः दधायादी हृत्रिरीत्याह या
त्यनेनेति उद्दालदत्तस्तु यजदेव एजादौजकार स्पष्टकारो यज्ञाद्यजमानइत्याह वैदिकनिघंटो महत्राम
सुपद्धपाठः पठितः प्रवोयद्ध पुरूणांयद्ध महान्तमिति वेदभाष्ये लिट् आस्वादने लिहंत्यमयेति जिह्वा जिज्ञ ५३

येडुगागमः जिह्वा रसने स्युदात्तलदन्तः ग्रीवेति गृ निगरणे आस्याम्भोमीङ् हिंसायां मीवेति भेदे स्युस्नुमी
वेति छित्वास्यमंशगेडुत्तमसात्त्वः ह्रुढेमुक्तं अमी वहावास्तोष्यंते इत्यादिमंत्रात्त्वाम्रुह्रुलाः क्रुग्दविदोपे
ष्ठ निगरणे अस्रू हिंसायां दृ विदारणे गर्भः अर्दंकभः सर्वधातुभ्यः अः कनिम्यु सुमिश्रणे वृषु सेचने तस्मात्तन्मूक
रणे राजदीमृाधविगमर्थः सन्अभिगमने दिवुक्रीडादौ सुवाम्यां तस्मा ऽश्रेष्टे निसर्गवलशालिनीति मेदिनी
वृषकर्णमर्द्दने ला इति च तस्मात् वर्द्धकि स्तष्टा रथकारस्त्वकाष्टतडितमरः राजा प्रभोन्नपे चंपते क्षत्रियशक्र
योरिति च समानो मतः धन्वा नावितिच अर्थास्त्रियां धनुश्चापौ धन्वशरासनकोदंडकार्मुकमितिचामरः ध
न्वा तु मरुदेशे नाक्लीवे चापे शरेपि वेति मेदिनी सध्वंसू भावं षपसमवाय अस्रू वा भौन जिह्रो हाकु मागोक
निनिष्यातोलोपः स्नुनुतन् दुष्टि गतिवृद्ध्योः उक्ष सेचने एषवृद्धौ स्विद्धर्मोन्तो मुढवे चिमिमेसुचीवंधनेउ
कारस्य दीर्घत्वं वकारस्य धकार इस्मुदत्त लदन्तः दुमस्तोस्रुहोमस्ते सकारस्य शकारस्य जन्मश्च न जः माङ्. मा
नेशाष्टे च पस्नाभद्रणे जनी माडुभावे दु ओखि गतिवृद्ध्योः कनिप्रसयां तानायानितिभावः केचित्तु निर्व
स्त्रीकृत्स्य उदात्तनादौ न्ना मह्रत्रेः नो दान्तनिपातनमाडु स्त्वस्वगोरवयस्तमिन्नपेहितंस्येति इकारलोपो निपात्य
ते पूषेति सोवेम्रुपधादीर्घः इन्हन्पूषार्यम्णां इति नियमात् पूषणा पूषण इत्यादौ न दीर्घः ल्के दोषधियोश्छंदक्येयोरितिया

ल॰वो॰
नी॰
५४

रवः मर्द्दुरिति मर्द्दुर्नाम मल्लकोऽस्त्रियामित्यमरः मज्जेति नकारान्तोऽयं तावं तोप्यभ्युपगम्यते तुष्मयासार्द्धं म
ष्मापि मज्जो कोमज्जया सहेति द्विरूपकोशात् अर्घमातृभ्यमानसूर्येपितृदेवान्तरेपि चेति मेदिनी परिज्माय
ते इत्यादि एनच्च दशपादीवृत्त्यनुरोधेनोक्तं परिज्मानं सुखं रथ्यमिति मंत्रस्य भेदभाष्ये तु परिज्मायरितो गं
ता अजेः परिपूर्वस्य श्वन्नुक्षन्नित्यादिना मन्प्रत्ययः अकारलोपः आद्युदात्तत्वं च निपात्यते इत्युक्तम् त
त्तुलदत्तस्तु परिज्मेति पठित्वा ज्म इति सौत्रो धातुः परिपूर्वः यणादेशः परिज्मा चंद्र इत्याह तल्लक्षविरोधाद्युपे
क्ष्यं मातरिश्वेति सप्तम्या अलुक् इह तत्वविषये संप्रसारणं न भवति श्वयुवेति सूत्रे अभिव्यक्तपरत्वेन कुक्कु
रवाचकस्यैव श्वशब्दस्य तदंतस्य च ग्रहणात् तेन मातरिश्वनः मातरिश्वने इत्येवं इह सूत्रे इति शब्द आद्यर्थ
स्तेनान्येभ्योपि यथादर्शनं कनिः प्रयोक्तव्यः दशपाद्यां तु इति शब्दोत्र न पठ्यते इत्युणादिषु प्रथमः पादः
शकृभ्यां तु ह्रस्वः करणे हृस्वः हरणं करेणुरिभ्यां स्त्री नेत्यमरः करेणुर्गजयोषायां स्त्रियां पुंसि मतंगजे
इति मेदिनी गंधद्रव्यमिति कलायश्चेति वाध्यं कलायस्तु सतीनक इत्यमरः हरेणुर्ना सती ने स्त्री रेणुका कु
लयोषितोरिति मेदिनी विश्वप्रकाशो इति कृषिहृनहिंसागमोः कृशानुक कर्षाणि ज्ञापणो रमल्कीडा
यां कास्त्रदीमौ कुरुंटे रोगे पुष्करे स्त्री इति मेदिनी कुरुंटे रोगे ह्रगंधे चेति विश्वः मीयेनीयेमघवान्स्तता ५४

सइतिमंत्रे नीचशाद्दृ संगतो दान्तंतवाकुल्लकात् नाधे घेः स्तोत्रेइतिवेदभाष्यं रथः पुमान् वयवेस्यंदनेवेत
सेपिचेतिमेदिनी रथः स्यात्स्यंदने काये चरणे वेतसेऽपि चेति विश्वः काष्ठादारु द्रुरिद्रायां कालमानप्रकर्ष
योः स्यान मात्रे दिशि च द्वार्थे गौश हे ज्ञगतौ एभ्यस्यन् कोष्ठः कुदिषु स्थूलयोः गाथाश्लोके संस्कृतान्यभाषा
थां शेषवृत्तयोरिति मेदिनी अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिषु इत्यमरः शेषः स्थयपुः प्रगतौ मन्त्रैः स्र
गतौ सार्थं विणिक्स्न मह्हे स्या दपि संघातमात्रके इति मेदिनी विश्वप्रकाशेऽप्य वृज् ज्वयोर्द्दानौ कादिः ज्ञुष
दिवादौ वृज् ज्वरणे ऋचुस्तु तौ तल्लोग्नावं जनेन तत्लानीली ह्रस्वमेलयोरपीति विश्वः त ऋ मजनभेदे स्यान्नीले
ह्रस्वमेलयोः स्त्रियां सिक्थाभक्तपुलाके नाम धूच्छिष्टेन पुंसकमिति मेदिनी अर्त्तेः ऋगतौ ज्ञाषवाचस्तेत्रि
त्रेर्थंस्त्वनामितिमंत्रे निऋत्यादिं सेतिवेदभाष्यं निशीथ शीङ् स्वप्ने निपूर्वः पापानेगा एर्वः घुमास्थेतीत्वं
गाडुः सतो अवपूर्वधातोर्ड्रसत्वं निशीथस्तु पुमानर्द्धरात्रे स्यादात्रिमात्रके इति मेदिनी प्रतिसंचारः मध्वर
मितिमंत्रे गोपीथः सोमपानमितिवेदभाष्यं त्तीर्थमितितु शन्निकारः गश्चादि उदि उपपदे गेड्स स्मात्यक्
स्तमिड् एगतावस्मात्समि उपपदे थक् समिथशाद्दृः संग्रामपर्यायेषु वैदकनिघंटौ पठितः श्रियेजात इ
तिमंत्रे समिथाः युद्धानि इति वेदभाष्यं तच्च युक्तमेव मम्यगेति जयार्थमंत्रेति युत्पन्नेः संपूर्वकोणः क्विन्ना

(४९)

न॰वो॰
नी॰
५५

घंतस्य लोकेपि युद्धार्थत्वदर्शनाच्च उक्तं स्यमरणेसमित्याजिसमियुध इति तिथ १४ भिन्नतिशाने १५ युसे चने
गुप्तुरीषोत्सर्गेयुमिश्रणेस्तङ्गतौ एतथक्रमयाता निपातंते १४ तुचरमं तनोरितमरः १४ चरममांत्रे
पिदेहस्यावयवांतरे इतिमेदिनी स्तोत्रविशेषेपि १४ १५ स्तवते इत्यादौ तथा निर्दैयात् १५ मिति निपा
तनाद्दीर्घः एवं यूथेपि यूथं तिर्यक्समूहे पिदंदमात्रेपि भाषितमिति विश्वः यूथंतदग्रसरगर्वितस्स^
सारमिति रघुः प्रोथमिति निपातनाद्गुणः प्रोवो स्त्री हयघोणा यौ नाकटामथके त्रिषिति मेदिनी स्थयिते
चिस्फायी द्दृहाते चुसंकोचने चंचु मर्लचने शल्लश्लाको द्रिणभेरणे छदि रसंदीपणे सृ १४ गतौ तपप्रीणने ह
पहर्षमोचनयोः वदि अभिवादनस्तुत्योः उंचीक्लेदने खिभावर्णे द्दृह वर्त्तने अजगति द्दीपणयोः णीञ् प्राप
णे यदगतौ मदीहर्षेखिदैन्ये छिदिरद्वैधीकरणे भिदिरविदारणे मदि स्तुतौ चदि आह्लादे दह भस्मीकर
णे दस्तत्प्रदद्यये दंशु दंभने वसनिवासे वा प्रशाद्दृश्शीङ् स्वमेहसेदस्नेषिधिगत्यां प्रभेदौ मे। द्वात्रिंशतइति
दण्याद्यान्त्रयस्त्रिंशात् उक्ताः दंभिवृह्नी वसीतिपठित्वा वदमापणे उक्तः अनद्यानित्युदाहरणात्व माघ
वोप्येवं स्फारमिति नेड्वशीत्किती नेट्वलियलोपः स्फरः स्यात्पुंसि विकटे करकादेस्थ बुद्बुदे इति मेदिनी तंक्र
सुदस्मिन्माधितं पादावधौ ध्रुनिर्जलमित्यमरः चक्रः स्याजदिलेक्रपुटभेदे प्रानैश्चरे इति विश्वः प्राक्रः पु ५५

मान्देवराजेकुटजार्जुनभूरुहोरिति मेदिनी हृकः स्यादधमर्णः कर्तृपणलेखाचवदिति मेदिनीजनः पुरोडा
सैइतिनतप्राकृतविवृशमितिभेदभाष्यकारैरिहव्याख्यातं मकृत्तिस्मृत्वेउजलदिदन्ताभिस्त्रदशपायायादीर्घत्वेनेत
प्रमाजंघकाष्ठंचेतन्तकेतप्रदुः स्तुमितिमनुवर्णयानोनृत्तेमाधवः हिमांशुरित्यादिहिमद्युतिरित्यन्तशब्द्यालवः दश
तिरोगान्हृयतिदस्युः दस्युः शुरेमिनीस्युतेतिदिनीदस्युः स्वरेचास्थिनयोरितिविश्वः प्रपसिवसीतिमाप्रम
पिमेदिनी एवंचऋविंदउस्त्रियाइतिमंत्रेपृषत्वाभावः स्निहो माधववल्लवृत्तिगंधान्तुरोधेनवाकुलकादिदूष
वनेतिव्याचष्टेउस्रावृषेचाकिरणेउस्राज्नसुपवित्रयोरितिमेदिनीमाहेयीसैरभेयीगोहस्त्रामाहीचऋशंग
णीत्यमरः वास्त्रानादिवसेक्लीवंमंदिरेचचत्नःपथ्ये इतिमेदिनीवस्त्रारासभयथदिगणेरितिकेचिन्माध
पेननुवाश्रेवविद्युन्निमीलतातिमंत्रेशाहृयुक्ताप्रसक्तनाथेनुवाश्रेतिव्यासातंप्शुभ्रंस्यादभ्रकेक्लीवस्नुदी
मस्नुहरूयोस्त्रिष्वितिमेदिनीयुक्तमितिमस्तूखंडनेचकिचकत्सैरमक्रीडायांभ्रुकुस्त्वम्लेः स्त्रवेतसेचुक्री
चांगेरिकायांस्याद्वृक्षाम्लेशुक्रमिष्यतइतिविश्वः कैकसेः कसगतौविपश्वादस्मादूरुक्स्याउत्वंचोपधायाः
अस्मिः अस्मिगत्यादिषुतमूकात्सायांग्राभ्यांरकुस्याद्रुपधायादीर्घश्चनिंदेः णिदिकत्सायां अर्दैः अर्दगतौ
आर्द्रानक्षत्रमेदेस्यात्स्त्रियांक्लिन्नेअभिधेयवदितिमेदिनीभ्रुचेः भ्रुचशोके अस्मादूरुदस्ज्ञातादेषाः धातो

न॰बो॰ नी॰ ५९

दीर्घः सूत्रोत्वषलः श्रदद्रूरेत्वा सूत्रेतिश्रुतोरुदेवाधायोगएवपुरस्कृतः तथाचोत्तरतंत्रेभगवतान्यासेनस्व
त्रितंस्वगस्यतदन्यतरस्मवणादितितुरीणाद्गुणागतानावित्यस्यानदुपर्युपपदेरकुस्याद्वातालोपश्चरोरीतिवेफ
स्यलोपेद्व्जोपढ्रलेतिदीर्घः कृतेः कृतीच्छेदनेइत्यस्मादृकुस्यात्तहकृइत्येभावादेशौचस्तवस्तनस्यादेशःकव
नेकालत्वात्सर्वस्यादेशः कृच्छ्रमाख्यातमाभीलपापसंघातादिनोरितिविश्वमेदिन्यौस्यात्कष्टेकृच्छ्रमा॰
भीलमित्यमरः क्रूरस्तुकठिनेघोरनृशंसेचाभिधेयवदितिविश्वः नृशंसधातुकः क्रूरः पापोधूर्तस्तुवंचक
कइत्यमरः रोदेः हदिर अश्रुविमोचने एयंभादस्मादृकुणोश्च लक्रूणोरनिटीतिलोपेतत्प्रगंतेतिगुणः स्या
दितिणिलुकुचस्मुत्के रोदयतीतिरुद्रः नन्वेवंसोरोदीद्यदरोदीत्तदुत्वमितिश्रुत्यासहविरोधोत्रस्यादितिचेन्न अ
त्राद्गुः कर्त्तरिकृदितिसूत्रानुरोधेनशंतुरिमत्रसंभावयतीमंतर्भावितएयर्थतायथास्वीक्रियतेतथाश्ररोदीदि
सत्राप्यंतर्भावितएयर्थतायांस्वीकृतायांरोदनकानिमर्थलाभान्नास्तिश्रुतविरोधः नचदेवैरग्नेर्वाग्निच
स्वपस्थापितंतच्चधनंदेवैर्याचितंचेदग्निस्तुरोदनंष्टःतवानिति सोत्रोदीदित्यादिश्रुत्यर्थादिहांतरभावि
तएयर्थकल्पनंनसंभवतीतिश्रुतविरोधस्तपरिहार्यएवेतिवाच्यं देवैः स्थापितंवामंवस्तुदेवेभ्योग्निनान
दत्तंवेदेवाएवरोदनंकृतवन्तः अग्निस्तुतदीयमदत्वारोदनंकारितवानित्यर्थकल्पनायांसंभवात्त् अ ५९

यथा अधुना प्रयुज्यमानरुद्रशब्दस्य रोदतीति रुद्र एवार्थो लक्षपरं तु प्रत्ययविस्तरुद्रा इति अवक्रियमाणो यो
रुद्रलक्ष्यवकरुद्रशब्दस्य रोदेरिगुणादिसूत्रेणानुरोधेन रोदयतीति रुद्र इत्यर्थकल्पनायां वारकाभावात्
अकृतविरोधोऽत्र नास्त्येवेति ॥ अधाप्यपीति धात्वंतरात्प्रत्ययांतरे पिणेर्लुगित्यर्थः संज्ञायां समुदाहरणं दृष्टं द्रयति
वर्द्धयतीति प्रज्ञाः ब्रह्माणं सुखं भावयतीति प्राभृरित्यादि छंदसि तत्र दृष्धु दृंहौ वर्द्धंत्वनात्मुष्टुनद्यः वर्द्धयति त्विस
र्थः यद्यमाजेज्ञानज्ञनीप्रादुर्भावे लिटि रूपं जनयामासेत्यर्थः इहणालिपरतः अत उपधाया इति वृद्धिर्भव
त्येव जनिवध्योश्चेति निषेधस्य चिण्णिज्ञिनिणिति किति च श्लीकारात् न चणिलोपे सति प्रत्ययांतत्वात् कास्प्र
त्ययादित्याम्प्रस्यादिति वाच्यं अमंत्र इति पर्युदासात् आमोऽप्रसक्तेः कास्यतेका च इति वात्र्ते केनतृ आमष्टाका
दृशापास्तो वा लिटि णिलोपे सति अनेकाच्त्वाभावात् न उणलिणेरनिटीत्यमिउवा ईधातुके णिलोपे जज्ञाते
निरूपसिद्धमिति किमनेन लक्ष्यमुदाहरणेनेति चेत् मैवं णिलोपे सति जनीरघुके स्तुरजोमंतास्चेति णेर्मि
त्वेमितां ह्रस्वः स्यात् प्रत्ययलक्षणन्यायेन णिपरत्वसंभवात् तत्रश्च जजनेति स्यात् किं सति तु प्रत्ययलक्षण
न्यायो न प्रवर्त्तत इति मित्वाभावादिष्टं सिध्यति वा कुलकादसंज्ञाछंदसोरपि पक्षे चिद्भवती माष्ठायेनोदाहरति
वंतात्सादि पर्णीति प्राग्वयंतीति पर्युपः पर्णानि मोचयंतीति पर्णसमुचः जोरी चञ्जगतो मैत्रे अस्मात्

५५

न॰ टी॰
नी॰
५७

कईकारश्चांतादेशः जीवः स्वेद्रेववणिग्दक्षे इति विश्वः जीरस्तु जरणे खड्गे इति मेदिनी ज्याश्चेति ज्या वयो।
हानावस्मादूङ् ग्रहिज्येति संप्रसारणं पूर्वरूपं हल इति दीर्घः एके इति सूत्र (आइ)मर्थः तथा च न धातुलो
प इति सूत्रे जीवेरदानुरित्यस्य प्रत्याख्यानार्थं नैतज्जीवेरूपं किंतु रक्किज्यः संप्रसारणमिति भाष्ये उक्तं तू
लम्पापुजभिषवे चू उ॰ प्राणि गर्भविमोजने इधाञ् धारणादौ ग पुष्पभिकांक्षायां सुरा चषमद्ययोः पु
ल्लिंगस्तु देवे स्यादिति मेदिनी सुरो देवे सुरा मद्ये चषकेपि सुरार्कविदिति विश्वः सवति प्रेरयति कर्मणि
लोकमिति सूरः सूर्यः सूरः सूर्यार्यमादित्येत्यमरः धीरोधीर्यान्विते स्वैरे बुद्धे क्लीबं कुंकुमे स्त्रियां श्रवण
तुल्यामिति मेदिनी ग ए॰ खगांतरे पुंसि वाच्यलिंगो ग्यघलब्धके इति च भूसि विश्वगतो षिञ् बंधने
विञ् चयने डुमिञ् प्रक्षेपणे एभ्यः क्रन् एषां दीर्घत्वं च श्रूरः सामादपेइ इति मेदिनी शूरस्त्वाहभटे सूर्ये इति
